THE

# SÁNKHYA KÁRIKÁ,

OR

## MEMORIAL VERSES ON THE SÁNKHYA PHILOSOPHY,

BY

ÍSWARA KRISHNA;

TRANSLATED FROM THE SANSCRIT

BY

HENRY THOMAS COLEBROOKE, ESQ.

ALSO

## THE BHÁSHYA OR COMMENTARY OF GAURAPÁDA;

TRANSLATED, AND ILLUSTRATED BY AN ORIGINAL COMMENT,

BY

HORACE HAYMAN WILSON, M.A. F.R.S.

MEMBER OF THE ROYAL ASIATIC SOCIETY, AND OF THE ASIATIC SOCIETIES OF PARIS AND CALCUTTA, &c. &c.;

AND BODEN PROFESSOR OF SANSCRIT IN THE UNIVERSITY OF OXFORD.

EX ORIENTE LUX

OXFORD,

PRINTED FOR THE ORIENTAL TRANSLATION FUND OF GREAT BRITAIN AND IRELAND,

BY S. COLLINGWOOD, PRINTER TO THE UNIVERSITY.

PUBLISHED AND SOLD BY A. J. VALPY, A. M., LONDON.

1837.

TO

SIR GRAVES CHAMNEY HAUGHTON, M.A. F.R.S.

AS TO ONE

WHO WAS THE FRIEND AND ADMIRER

OF THE LATE

HENRY THOMAS COLEBROOKE;

WHO IS QUALIFIED,

BY HIS CONVERSANCY WITH THE SANSCRIT LANGUAGE

AND METAPHYSICAL INQUIRIES,

TO APPRECIATE THE CORRECTNESS WITH WHICH

THE PHILOSOPHY OF THE HINDUS

IS REPRESENTED IN THE FOLLOWING PAGES;

AND

WHO HAS FOR MANY YEARS BEEN UNITED WITH THEIR AUTHOR

IN STUDIES, SENTIMENTS, AND FRIENDSHIP;

THE PRESENT WORK IS INSCRIBED,

AS A PUBLIC TESTIMONY OF ESTEEM AND REGARD,

BY

HORACE HAYMAN WILSON.

# PREFACE.

ONE of the works earliest announced for publication by the Oriental Translation Fund Committee was the *Sánkhya Kárika*, a text book of that system of Hindu philosophy to which the term *Sánkhya* is applied, and which had been translated from Sanscrit into English by that eminent Sanscrit scholar the late Henry Thomas Colebrooke. The accession of the lingering illness which finally terminated in his decease prevented Mr. Colebrooke from conducting his work through the press, and from adding to the translation those explanations and illustrations which the text required, and which he was most competent to supply. Upon my return to England from India, therefore, in the beginning of 1833, I found that no progress had been made in the publication, and that the Translation of the text alone was in the possession of the Committee.

Being desirous of redeeming the pledge which they had publicly given, and of accomplishing the purpose which they had announced, the Committee thought it desirable that the Translation, in its then existing form, should be printed; and conceived that, as its extent was insufficient to constitute a separate work, it would be advisable to print it in the Transactions of the Royal Asiatic Society. With this view the manuscript was placed in my hands, that I should render such assistance as I might be able to afford in the correction of the press.

Conceiving that the appearance of the Translation in the pages of the Transactions would be equally incompatible with the views of the Translator and the original intention of the Committee, I ventured to recommend that their purpose should be adhered to, and

that the Translation should be printed, as at first designed, as a separate work; offering at the same time to supply such annotations as the text might seem to require, to be rendered sufficiently intelligible and explicit. The Committee approved of the suggestion, and Mr. Colebrooke's concurrence was readily obtained.

In the meantime, in the interval that had elapsed since the work was announced, other translations of the *Sánkhya Káriká* had appeared. The Sanscrit text, and a version of it in Latin by Professor Lassen, had been printed at Bonn *; and the text in Roman characters, with a French translation, had been published at Paris by Mons. Pauthier †. Many of the verses of the translation had been also embodied in Mr. Colebrooke's general view of the Sánkhya philosophy; and it appeared to me expedient, therefore, to make some such addition to the work as should give it at least more novelty than it was otherwise likely to possess. It seemed also to be a favourable occasion for offering to Sanscrit students an exemplification of the mode in which philosophical works are illustrated by native commentators; and I accordingly procured the consent of the Translation Committee to print, not only the text and translation of the *Sánkhya Káriká*, but the text and a translation of the oldest, and perhaps the best, commentary upon the *Káriká*, the *Bháshya* of Gaurapáda. In order likewise to fulfil the object of attempting to render the doctrines of both text and comment as clear and explicit as it was in my power to represent them, I further added to the translation of the *Bháshya* a comment of my own, deriving my elucidations however, to a very great extent, from the works of native scholiasts, and giving the original passages at the foot of the page.

The scholia which have been used for this purpose are the

* Gymnosophista: sive Indicæ Philosophiæ documenta. Vol. I. Iswara Crishnæ Sankhya-Caricam tenens. Bonnæ ad Rhenum, 1832.

† Essais sur la Philosophie des Hindous, traduits de l'Anglais, et augmentés de textes Sanskrits, &c.; par G. Pauthier. Paris, 1833.

*Sánkhya Tatwa Kaumudí* of VÁCHESPATI MISRA, and the *Sánkhya Chandriká* of NÁRÁYÁNA TÍRTHA. The *Sánkhya Kaumudí* of RÁMA KRISHNA has been also consulted, but it is almost word for word the same as the *S. Chandriká*, and is therefore in most instances superfluous. I have occasionally referred to the *Sánkhya Sára*, a separate tract on the doctrines of this school by VIJNÁNA BHIKSHU; but another work by the same scholiast, the *Sánkhya Pravachana Bháshya*, a commentary on the *Sútras* or aphorisms of KAPILA, the first teacher of the Sánkhya, according to tradition, has been of particular service, and will be found often cited. Copies of these different commentaries, as well as of the text, exist in the library of the East India Company, and the *Sánkhya Pravachana Bháshya* was printed at Serampore in 1821. I have, however, followed a manuscript copy, as I did not obtain a copy of the printed work until my translation was finished.

There was little need of the labour of collation, after the very accurate text of Professor Lassen. I have not failed, however, to compare the reading of the different copies, and have noticed a few of the variations: none of them are of any great importance. Where collation was most wanted, it was unfortunately not practicable, there being but a single copy of the *Bháshya* of GAURAPÁDA in my possession. The manuscript was luckily tolerably correct, but it was doubtful in some places, and clearly faulty in others; and I may not have always succeeded in rightly correcting, or in accurately interpreting it. With regard to typographical errors in the present edition of text and comment, I trust they will not be found very inexcusable, especially when it is known that the work was for the greater part necessarily carried on at a distance from me, during my absence in London, and that it is the first publication in Sanscrit printed at the Press of the University of Oxford.

Not having made the Sánkhya philosophy a subject of study in India, I have executed my task without the advantage of previous

preparation. The subject indeed is but little cultivated by the Pandits, and during the whole of my intercourse with learned natives I met with but one Brahman who professed to be acquainted with the writings of this school. Opportunity was wanting to benefit by his instructions, and I cannot therefore venture to claim exemption from those liabilities to error to which the unassisted study of Sanscrit literature in Europe is exposed, especially when directed to topics sufficiently obscure and difficult in themselves, and rendered still more so by the sententious and elliptical style in which they are treated. It is the fashion with some of the most distinguished Sanscrit scholars on the continent to speak slightingly of native scholiasts and Pandits, but this is the consequence of measuring their merits by a wrong scale, and censuring them for venial inaccuracies which often proceed from too entire a familiarity with their subject. In all studies which native scholars professedly pursue, they have the advantage of traditional tuition, of a course of instruction, coming down, through successive generations, from the founder of a system, or the author of a book, to the individual who explains the one or illustrates the other, and from whose interpretation we may therefore reasonably expect to learn what it was originally meant to teach. There are also in all philosophical works, especially, brief hints and conventional allusions, which without such aid it is not possible to decipher, and for the proper understanding of which a native explanation is indispensable. Without therefore in the least degree undervaluing European industry and ability, I cannot consent to hold in less esteem the attainments of my former masters and friends, the Sanscrit learning of learned Brahmans.

The translations to which I have above referred are highly creditable to the translators. That of Professor Lassen in particular is of great merit and accuracy, and is illustrated by annotations, in which he has successfully cleared up many of the obscurities of the original text. I have taken the plan of his notes as in some degree the

model of my comment; and although I do not always concur in his interpretations or explanations, I have found them always entitled to attention and respect. In one or two instances, and especially in regard to the first stanza, where I have most widely differed from him, I have sought rather to vindicate the accuracy of Mr. Colebrooke, than to impugn that of Professor Lassen. Variety of interpretation in such a case as that of a difficult work, on an abstruse subject, is no more than may be expected from different interpreters; and occasional misapprehension implies no want of either competency or care.

In the course of my attempts to elucidate the text, I have in a few instances pointed out what seemed to me to offer remarkable coincidences with the doctrines of classical philosophers. That an intimate connection exists between the metaphysical systems of the Hindus and those of the Greeks is generally admitted, although its extent has not yet been fully made out. We are scarcely yet indeed in possession of the means of instituting an accurate comparison, as the text books of the Hindus have not been printed or translated, and general dissertations, however comprehensive or profound, are insufficient for the purpose. The present publication will go some way, perhaps, towards supplying the deficiency, and may afford, as far as it extends, authentic materials for the use of those better qualified classical scholars who may be curious to ascertain in what degree the speculations of Plato and Aristotle correspond with those of Kapila and Gautama, or how far the teachers of one school may have been indebted to those of another. That the Hindus derived any of their philosophical ideas from the Greeks seems very improbable; and if there is any borrowing in the case, the latter were most probably indebted to the former. It has been objected to this conjecture, that the total want of chronology in Hindu writings renders it impossible to pronounce upon their date, and that it is probable that many works regarded as ancient are really very modern, as they may

have been composed long after the æra of Christianity; the notions which they inculcate being in fact acquired from the Greeks of Alexandria, through the intercourse between India and Egypt. That this intercourse may have exercised a mutual influence upon some parts of the philosophy of both countries in the first ages of Christianity—that resemblances, respectively interchanged, may be detected in the notions of the new Platonists or Platonic Christians and of the more modern Védantis, or in the eclectic pantheism of the Pauraniks—is not impossible; but the Greek philosophy of that period can scarcely have suggested the severer abstractions of the Sánkhya, and we must go back to a remoter age for the origin of the dogmas of Kapila. In truth, the more remote the period, the closer the affinity that seems to prevail; and as far as we are acquainted with the tenets of the Ionic and Italic schools, it is with them that Hindu philosophy, unalloyed with pantheism, seems to claim kindred, rather than with the mysticism of Plato, or the subtleties of Aristotle. The metempsychosis itself is an important feature in this similitude: for this belief is not to be looked upon as a mere popular superstition; it is the main principle of all Hindu metaphysics; it is the foundation of all Hindu philosophy. The great object of their philosophical research in every system, Brahmanical or Buddhist, is the discovery of the means of putting a stop to further transmigration; the discontinuance of corporeal being; the liberation of soul from body. That such was the leading principle of the philosophy of Pythagoras we learn from ancient testimony, and it essentially influences the speculations of Plato. Concurrence in this principle involves agreement in all the most important deductions from it, and establishes, if not a mutual interchange, at least a common origin, for much of the oldest philosophy of the Greeks and the Hindus. This is a subject, however, to which I can here but thus briefly allude, and to which I would rather invite the attention of some of the eminent scholars of whom the University of Oxford has reason

to be proud, than impair its interest by my own less competent attempts at its elucidation.

The whole scope and leading tenets of the Sánkhya philosophy have been most accurately described by the late Mr. Colebrooke, in the Transactions of the Royal Asiatic Society, from various original authorities, including that now published, the *Káriká*, or rather *Kárikás*, of the Sánkhya system; the term designating a collection of memorial verses, of apothegmatical stanzas, in which the chief tenets of the school are textually and dogmatically stated. The Sánkhya philosophy is so termed, as Mr. Colebrooke has mentioned, because it observes precision of reckoning in the enumeration of its principles, *Sánkhya* being understood to signify 'numeral,' agreeably to the usual acceptation of *Sankhyá*, 'number;' "and hence its analogy to the Pythagorean philosophy has been presumed." The term is also explained, however, as Mr. Colebrooke proceeds to mention, to denote the result of deliberation or judgment, such being one sense of the word *Sankhyá*, from which *Sánkhya* is derived.

Agreeably to the purport of the word *Káriká*, 'a technical or memorial verse,' the following work consists of a series of stanzas systematically arranged, though not always obviously connected; and asserting principles, rather than discussing arguments. The tract opens with an explanation of the object of this and of all philosophy, ascertainment of the means by which the pain of corporeal existence may be finally and absolutely remedied, and the soul freed for ever from body: this is declared alone to be philosophy, or the knowledge of the real nature of all that is, agreeably to the *Sánkhya* enumeration of things. These things, in number twenty-five, are briefly indicated with reference to their relative character, as producing or produced; and the work then pauses to explain the means by which they may be known, or perception, inference, and authority. Reverting then to such of the twenty-five things or principles as are imperceptible, especially to the first material cause, and to soul,

logical proofs of their actual existence are adduced, and the points in which they agree or differ with other things, and with each other, are described. We have then an explanation of the three essential qualities of things; purity or goodness; imperfection, foulness, or passion; and indifference, stupidity, or darkness. The existence of a general, imperceptible, unseparated, universal cause, the substance of which all is made, the eternal matter of the Greek cosmogonies, is then argued; and, as a consequence of its existence, that also of a spiritual nature, or soul, is asserted. The properties of soul are then detailed. We have next the twenty-five *Tatwas*, 'categories or principles,' of the Sánkhya philosophy severally described. These all resolve themselves, as may be inferred from what has preceded, into but two, matter and spirit, nature and soul; the rest are all the progeny or products of nature, evolved spontaneously through the necessity of nature's providing for the two purposes of soul, fruition and liberation. These products are, intelligence; egotism or individuality; eleven senses, ten external and one internal, or mind; five rudimental elements, or elements of elements; and five gross or perceptible elements, ether, air, water, fire or light, and earth. The description of these different categories, of their mode and objects of acting, of their modifications, and of their effects, occupies a considerable number of *Kárikás*. We have then a general account of bodily condition of two kinds, subtile and gross; the latter perishing at death, the former accompanying and investing soul through all the migrations to which the various conditions of the intellectual faculty, or virtue and vice, subject it. Those conditions are then detailed at length, and in all their modifications, constituting what is called intellectual creation, or life, consequent upon conduct, originating with the intellect. But, to give effect to these modifications, form, as well as life, is said to be necessary; and hence results personal or bodily creation of various descriptions. Bodily existence, however, is described as confinement and pain, from which soul is anxious to

be exempted. Nature is said to labour also for soul's liberation, and to supply the means, in the display which it makes of its products, until soul, fully possessed of their real character and tendency, is represented as casting away all notions of individuality and self, and is no more condemned to bodily incarceration. The work closes with stating that these truths were taught originally by KAPILA to ÁSURI, and by him to PANCHASIKHA, from whom it descended, through repeated generations of disciples, to ÍSWARA KRISHNA, the author of the *Kárikás*. The date of this writer is not known, but Mr. Colebrooke considers GAURAPÁDA, the scholiast on the *Káriká*, to be the same as the preceptor of the celebrated teacher SANKARA ÁCHÁRYA, whom there is reason to place in the eighth century. How long anterior to this the *Kárikás* existed in their present form, we have no means of knowing, but they were avowedly subsequent to other standard compositions of the school, and evidently represent doctrines of high antiquity, doctrines exhibiting profound reflection and subtle reasoning; although, like all the efforts of human intellect to penetrate unaided the mysteries of existence, wholly unavailing, and too often ending, as Cicero complains, in doubt and impiety: "Cogimur dissensione sapientum Dominum nostrum ignorare."

Some excuse is perhaps necessary for having delayed to publish the present work so long after the Committee of the Oriental Translation Fund had sanctioned its publication. The work, as it is now offered to the public, was ready for press in the course of the year following that in which it was undertaken. Being desirous, however, of printing it at Oxford, where the University had liberally resolved to provide its Press with two new founts of Devanagari letters, I was under the necessity of awaiting the completion of the types. As soon as one fount was supplied, the text was printed. It was my wish to have employed the other and smaller fount for the citations which accompany my Comment; but that fount being not yet cast,

I have thought it preferable to incur no further delay. It is scarcely doing justice to types of the size here employed to place them in juxtaposition with characters so much smaller as those of the English alphabet; but looking at them by themselves, in the pages of the text, I think they will be found to wear a more genuinely Oriental aspect than any that have yet been fabricated in Europe.

OXFORD,
July 1, 1837.

# श्रीमदीश्वरकृष्णेन

विरचितः

# सांख्यकारिकाख्यग्रन्थः

श्रीगौडपादकृतभाष्यसहितः

---

श्रीमतां पूर्व्वदेशीयभाषालिखितग्रन्थावतारप्रपादकानां

सामाजिकानामनुमत्या

---

उक्षतरणाभिधाननगरे विद्यामन्दिरसंस्थानमुद्रायन्त्रालये मुद्रितः

संवत्सरे १८३७

# सांख्यकारिका

दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ
दृष्टे सापार्थाचेन्नैकान्तात्यन्ततोऽभावात् ।१।

## सांख्यकारिका भाष्यं

कपिलाय नमस्तस्मै येनाविद्योदधौ जगति मग्ने
कारुण्यात् सांख्यमयी नौरिव विहिता प्रतरणाय ।
अल्पग्रन्थं स्पष्टं प्रमाणसिद्धान्तहेतुभिर्युक्तं
शास्त्रं शिष्यहिताय समासतोऽहं प्रवक्ष्यामि ॥

दुःखत्रयेति । अस्या आर्य्याया उपोद्घातः क्रियते ॥ इह भगवान् ब्रह्मसुतः कपिलो नाम तद्यथा । सनकश्च सनन्दनश्च तृतीयश्च सनातनः

आसुरिः कपिलश्चैव वोढुः पञ्चशिखस्तथा ।
इत्येते ब्रह्मणः पुत्राः सप्त प्रोक्ता महर्षयः ॥

कपिलस्य सहोत्पन्ना धर्म्मो ज्ञानं वैराग्यमैश्वर्य्यञ्चेति । एवं स उत्पन्नः सन्नन्धतमसि मज्जज्जगदालोक्य संसारपारम्पर्य्येण सत्कारुण्यो जिज्ञासमानाय आसुरिसगोत्राय ब्राह्मणायेदं पञ्चविंशतितत्वानां ज्ञानमुक्तवान् यस्य ज्ञानाद्दुःखक्षयो भवति ।

पञ्चविंशतितत्वज्ञो यत्र तत्राश्रमे वसेत्
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ।

तदिदमाहुः । दुःखत्रयाभिघाताज्जिज्ञासेति । तत्र दुःखत्रयं । आध्यात्मिकं । आधिभौतिकं । आधिदैविकंचेति ॥ तत्राध्यात्मिकं द्विविधं शारीरं मानसं चेति । शारीरं वातपित्तश्लेष्मविपर्य्ययकृतं ज्वरातीसारादि । मानसं प्रियवियोगाप्रियसंयोगादि ॥ आधिभौतिकं चतुर्विधं भूतग्रामनिमित्तं मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो ज

रायुजाण्डजस्वेदजोद्भिज्जेभ्यः सकाशादुपजायते ॥ आधिदैविकं । देवाना मिदं दैविकं । दिवः प्रभवतीति वा दैवं तदधिकृत्य यदुपजायते शीतो ष्णवातवर्षाशनिपातादिकं ॥ एवं यथा दुःखत्रयाभिघाताज्जिज्ञासा कार्य्या क्व । तदभिघातके हेतौ । तस्य दुःखत्रयस्य अभिघातको योऽसौ हेतु स्तत्रेति ॥ दृष्टे सापार्थाचेत् । दृष्टे हेतौ दुःखत्रयाभिघातके सा जिज्ञा साऽपार्था चेद्यदि । तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्रक्रियया प्रियसमागमाप्रियपरिहारकटुतिक्तकषायादिक्काथादिभिर्दृष्ट एव आध्यात्मि कोपायः। आधिभौतिकस्य रक्षादिनाऽभिघातो दृष्टः। दृष्टे साऽपार्था चेदेवं मन्यसे न । एकान्तात्यन्ततोऽभावात् । यत एकान्ततोऽवश्यं अत्यन्ततो नित्यं दृष्टेन हेतुनाऽभिघातो न भवति तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विविदिषा कार्य्येति ।

---

दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तः
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ।२।

---

यदि दृष्टान्यत्रजिज्ञासा कार्य्या ततोऽपि नैव यत आनुश्रविको हेतुः दुःख त्रयाभिघातकः। अनुश्रवतीत्यनुश्रवस्तत्रभवः आनुश्रविकः स च आगमा त्सिद्धः । यथा

अपाम सोमममृता अभूमागन्मज्योतिरविदाम देवान्
किन्नूनमस्मान् कृणवदरातिः किमु धूर्त्तिरमृतमर्त्त्यस्य ॥

कदाचिदिन्द्रादीनां देवानां कल्प आसीत् । कथं वयममृता अभूमेति विचार्य्यामुंयस्माद्वयमपाम सोमं पीतवन्तः सोमं तस्मादमृता अभूम अमरा भूतवन्त इत्यर्थः किंच अगन्म ज्योतिः गतवतो लब्धवतो ज्योतिः स्वर्गमिति । अविदाम देवान् दिव्यान् विदितवन्तः । एवं च किन्नून मस्मान् कृणवदरातिः नूनं निश्चितं किं अरातिः शत्रुरस्मान् कृणवत्

करोतीति किमु धूर्त्तिरमृतमर्त्यस्य धूर्त्तिर्जरा हिंसा वा किं करिष्यति अमृत मर्त्यस्य ॥ अन्यच्चवेदे श्रूयते आत्यन्तिकं फलं पशुवधेन । सर्वांल्लोकां जयति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां तरति यो योऽश्वमेधेन यजत इति । एकान्तात्यन्तिके एव वेदोक्ते अपार्थेवजिज्ञासा इति न । उच्यते । दृष्टवदानुश्रविक इति दृष्टेन तुल्यो दृष्टवत् । कोऽसौ आनुश्रविकः कस्मात्स यस्मादविशुद्धिक्षयातिशययुक्तः । अविशुद्धियुक्तः पशुघातात् तथाचोक्तं

षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि
अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥

यद्यपि श्रुतिस्मृतिविहितो धर्म्मस्तथापि मिश्रीभावादविशुद्धियुक्तइति । यथा

बहूनीन्द्रसहस्राणि देवानां च युगे युगे
कालेन समतीतानि कालो हि दुरतिक्रमः ॥

एवमिन्द्रादिनाशात्क्षययुक्तः । तथाऽतिशयो विशेषस्तेन युक्तः । विशेष गुणदर्शनादितरस्य दुःखं स्यादिति । एवमानुश्रविकोऽपि हेतुर्दृष्टवत् ॥ क स्तर्हि श्रेयानितिचेत् । उच्यते । तद्विपरीतः श्रेयान् ताभ्यां दृष्टानुश्रविका भ्यां विपरीतः श्रेयान् प्रशस्यतर इति । अविशुद्धिक्षयातिशयायुक्तत्वात् । स कथमित्याह । व्यक्ताव्यक्तज्ञविज्ञानात् तत्र व्यक्तं महदादिबुद्धिरहंकारः पञ्च तन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि । अव्यक्तं प्रधानं । ज्ञःपु रुषः । एवमेतानि पञ्चविंशति तत्वानि व्यक्ताव्यक्तज्ञानि कथ्यन्ते एतद्विज्ञा नाच्छ्रेय इत्युक्तं च पञ्चविंशति तत्वज्ञ इति ॥ अथ व्यक्ताव्यक्तज्ञानां को वि शेष इत्युच्यते ।

---

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त
षोडशकस्तुविकारो न प्रकृतिर्न विकृतिः पुरुषः ।३।

---

मूलप्रकृतिः प्रधानं । प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात् । मूलं च सा प्रकृतिश्च मूलप्रकृतिरविकृतिः । अन्यस्मान्नोत्पद्यते तेन प्रकृतिः कस्यचि

द्विकारो न भवति । महदाद्याः प्रकृतिविकृतयः सप्त । महाभूतादिति बुद्धिः बुद्ध्याद्याः सप्त बुद्धि १ अहंकारः २ पञ्चतन्मात्राणि ५ एतानि सप्तप्रकृति विकृतयः । तद्यथा । प्रधानाद्बुद्धिरुत्पद्यते तेनविकृतिः प्रधानस्य विकार इति । सैवाहंकारमुत्पादयति अतः प्रकृतिः । अहंकारोऽपि बुद्धेरुत्पद्यत इति विकृतिः स च पञ्चतन्मात्राण्युत्पादयतीति प्रकृतिः । तत्र शब्दतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तस्मादाकाशमुत्पद्यत इति प्रकृतिः । तथा स्पर्शतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेवं वायुमुत्पादयतीति प्रकृतिः । गन्धतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेवं पृथिवीमुत्पादयतीतिप्रकृतिः । रूपतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेवं तेज उत्पादयतीतिप्रकृतिः । रसतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेव आप उत्पादयतीति प्रकृतिः । एवं महदाद्याः सप्त प्रकृतयो विकृतयश्च ॥ षोडशकश्च विकारः पञ्चबुद्धेन्द्रियाणि पञ्चकर्म्मेन्द्रियाणि एकादशं मनः पञ्चमहाभूतानि एष षोडशको गणो विकृतिरेव। विकारो विकृतिः ॥ न प्रकृतिर्न विकृतिः पुरुषः ॥ एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः कियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति । इह लोके प्रमेय वस्तु प्रमाणेन साध्यते यथा प्रस्थादिभिर्व्रीहयस्तुलया चन्दनादि । तस्मात् प्रमाणमभिधेयं ।

---

दृष्टमनुमानमाप्तवचनं च सर्व्वप्रमाणसिद्धत्वात्
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ।४।

---

दृष्टं यथा श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमिति पञ्चबुद्धेन्द्रियाणि शब्दस्पर्शरूपरसगन्धा एषां पञ्चानां पञ्चैवविषया यथासंख्यं शब्दं श्रोत्रं गृह्णाति त्वक् स्पर्शं चक्षु रूपं जिह्वा रसं घ्राणं गन्धमिति । एतदृष्टमित्युच्यते प्रमाणं । प्रत्यक्षेणानुमानेन वा योऽर्थो न गृह्यते स आप्तवचनाद् ग्राह्यः । यथेन्द्रो देव

राजः उत्तराः कुरवः स्वर्गेऽप्सरस इत्यादि । प्रत्यक्षानुमानाग्राह्यमथाप्तव चनाद्गृह्यते । अपि चोक्तं ।

आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात्
स्वकर्म्मण्यभियुक्तो यः सङ्गद्वेषविवर्ज्जितः
पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः ॥

एतेषु प्रमाणेषु सर्व्वप्रमाणानि सिद्धानि भवन्ति । षट् प्रमाणानि जैमिनिः । अथ कानि तान्यप्रमाणानि । अर्थापत्तिः सम्भवः अभावः प्रतिभा ऐतिह्यं उप मानं चेति षट् प्रमाणानि । तत्रार्थापत्ति र्द्विविधा दृष्टा श्रुता च । तत्रदृष्टा । एकस्मिन् पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन्नप्यात्मभावो गृह्यत एव । श्रुता यथा । दिवा देवदत्तो न भुंक्ते अथ च पीनो दृश्यते अतोऽवगम्यते रात्रौ भुंक्त इति ॥ सम्भवो यथा । प्रस्थ इत्युक्ते चत्वारः कुडवाः सम्भाव्यन्ते । अभावो नाम । प्रागितरेतरात्यन्तसर्व्वाभावलक्षणः । प्रागभावो यथा देव दत्तः कौमारयौवनादिषु । इतरेतराभावः पटे घटाभावः । अत्यन्ताभावः खरविषाणवन्ध्यासुतखपुष्पवदिति । सर्व्वाभावः प्रध्वंसाभावोदग्धपटवदिति । यथा शुष्कधान्यदर्शनाद्वृष्टेरभावोऽवगम्यते । एवमभावोऽनेकधा ॥ प्रतिभा यथा । दक्षिणेन विन्ध्यस्य सह्यस्य च यदुत्तरं । पृथिव्यामासमुद्रायां स प्रदे शो मनोरमः । एवमुक्ते तस्मिन् प्रदेशे शोभनाःगुणाः सन्तीति प्रतिभोत्प द्यते प्रतिजान्वाससंज्ञानमिति ॥ ऐतिह्यं यथा । ब्रवीति लोको यथात्र वटे यक्षिणी प्रवसतीति एव ऐतिह्यं ॥ उपमानं यथा । गौरिव गवयः समुद्र इव तडागं । एतानि षट् प्रमाणानि त्रिषु दृष्टादिष्वन्तर्भूतानि । तत्रानुमाने तावदर्थापत्तिरन्तर्भूता । सम्भवाभावप्रतिभैतिह्योपमाश्चाप्तव चने । तस्मात्त्रिष्वेव सर्व्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं तदाह तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धिर्भवतीति वाक्यशेषः । प्रमेयसिद्धिः प्रमा णाद्धि । प्रमेयं प्रधानं बुद्धिरहंकारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति एतानिपञ्चविंशति तत्वानि व्यक्ताव्यक्तज्ञान्युच्यन्ते ।

तत्र किञ्चित् प्रत्यक्षेण साध्यं किञ्चिदनुमानेन किञ्चिदागमेनेति त्रिविधं प्रमाणमुक्तं तस्य किं लक्षणमेतदाह ।

---

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं
तल्लिङ्गलिङ्गिपूर्व्वकमाप्तश्रुतिराप्तवचनन्तु ।५।

---

प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेषु अध्यवसायो दृष्टं प्रत्यक्षमित्यर्थः । त्रिविधमनुमानमाख्यातं शेषवत् पूर्व्ववत् सामान्यतो दृष्टं चेति । पूर्व्वमस्यास्तीति पूर्व्ववद् यथा मेघोन्नत्या वृष्टिं साधयति पूर्व्ववृष्टित्वात् । शेषवद्यथा समुद्रादेकं जलपलं लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति । सामान्यतो दृष्टं । देशान्तराद्देशान्तरं प्राप्तं दृष्टं । गतिमच्चन्द्रतारकं चैत्रवत् । यथा चैत्रनामानं देशान्तराद्देशान्तरं प्राप्तमवलोक्य गतिमानयमिति तद्व चन्द्रतारकमिति तथा पुष्पिताम्रदर्शनादन्यत्रपुष्पिताम्रा इति सामान्यतो दृष्टेन साधयति । एतत्सामान्यदृष्टं ॥ किञ्च तल्लिङ्गलिङ्गिपूर्व्वकमिति तदनुमानं लिङ्गपूर्व्वकं यत्रलिङ्गेन लिङ्गी अनुमीयते यथा दण्डेन यतिः । लिङ्गिपूर्व्वकं च यत्र लिङ्गिना लिङ्गमनुमीयते यथा दृष्ट्वा यतिमस्येदं त्रिदण्डमिति ॥ आप्तश्रुतिराप्तवचनं च । आप्ता आचार्य्या ब्रह्माद्यः । श्रुतिर्वेदः । आप्तश्चश्रुतिश्च आप्तश्रुती तदुक्तमाप्तवचनमिति ॥ एवं त्रिविधं प्रमाणमुक्तं तत्र केन प्रमाणेन किं साध्यमुच्यते ।

---

सामान्यतस्तुदृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्
तस्मादपिचासिद्धं परोक्षमाप्तागमात् सिद्धं ।६।

---

सामान्यतो दृष्टादनुमानादतीन्द्रियाणामिन्द्रियाण्यतीत्यवर्त्तमानानां सिद्धिः

प्रधानपुरुषावतीन्द्रियौ सामान्यतो दृष्टेनानुमानेन साध्येते यस्मान्महदादि लिङ्गं त्रिगुणं। यस्येदं त्रिगुणं कार्य्यं तत्प्रधानमिति। यतश्चाचेतनं चेतनमिवाभाति अतोऽन्योऽधिष्ठाता पुरुष इति। व्यक्तं प्रत्यक्षसाध्यं। तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धं यथेन्द्रो देवराजः उत्तराःकुरवः स्वर्गेऽप्सरस इति परोक्षमाप्तवचनात् सिद्धं॥ अत्र कश्चिदाह प्रधानः पुरुषो वा नोपलभ्यते यश्च नोपलभ्यते लोके तन्नास्ति तस्मात्तावपि न स्तः। यथा द्वितीयं शिरस्तृतीयो बाहुरिति। तदुच्यते। अत्र सतामप्यर्थानामष्टधोपलब्धि र्न भवति तद्यथा।

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ।७।

इह सतामप्यर्थानामतिदूरादनुपलब्धिर्दृष्टा। यथा देशान्तरस्थानां चैत्र मैत्र विष्णुमित्राणां। सामीप्याद्यथा चक्षुषोऽञ्जनानुपलब्धिः। इन्द्रियाभिघाताद्यथा बधिरान्धयोः शब्दरूपानुपलब्धिः। मनोऽनवस्थानाद्यथा व्यग्रचित्तः सम्यक्कथितमपि नावधारयतिः। सौक्ष्म्याद्यथा धूमोष्मजलनीहारपरमाणवो गगनगता नोपलभ्यन्ते। व्यवधानाद्यथा कुड्येन पिहितं वस्तु नोपलभ्यते। अभिभवाद्यथा सूर्य्यतेजसाभिभूता ग्रहनक्षत्रतारकादयो नोपलभ्यन्ते। समानाभिहाराद्यथा मुद्गराशौ मुद्गः क्षिप्तः कुवलयामलकमध्ये कुवलयामलके क्षिप्ते कपोतमध्ये कपोतो नोपलभ्यते समानद्रव्यमध्याहृतत्वात्। एवमष्टधानुपलब्धिः सतामर्थानामिह दृष्टा। एवं चास्ति किमभ्युपगम्यते प्रधानपुरुषयोरप्येतयोर्वानुपलब्धिः केनहेतुना केन चोपलब्धिस्तदुच्यते।

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्य्यतस्तदुपलब्धिः
महदादि तच्चकार्य्यं प्रकृतिविरूपं सरूपं च । ८ ।

सौक्ष्म्यात्तदनुपलब्धिः प्रधानस्येत्यर्थः । प्रधानं सौक्ष्म्यान्नोपलभ्यते यथा काशे धूमोष्मजलनीहारपरमाणवः सन्तोऽपि नोपलभ्यन्ते । कथं तर्हि तदुपलब्धिः । कार्य्यतस्तदुपलब्धिः । कार्य्यं दृष्ट्वा कारणमनुमीयते । अस्ति प्रधानं कारणं यस्येदं कार्य्यं । बुद्धिरहंकारपञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि एव तत्कार्य्यं । तच्चकार्य्यं प्रकृति विरूपं । प्रकृतिः प्रधानं तस्य विरूपं प्रकृतेरसदृशं सरूपं च समानरूपं च यथा लोकेऽपि पितु स्तुल्य इव पुत्रो भवत्यतुल्यश्च । येनहेतुना तुल्यमतुल्यन्तदुपरिष्टाद्वक्ष्यामः । यदिदं महदादिकार्य्यं तत्किं प्रधाने सदुताहोस्विदसदाचार्य्यविप्रतिपत्तेरयंसं शयः । यतोऽत्र सांख्यदर्शने सत्कार्य्यं बौद्धादीनामसत्कार्य्यं । यदि सदस न्नभवत्यथासत्सन्नभवतीतिविप्रतिषेधस्तत्राह ।

असदकरणादुपादानग्रहणात् सर्व्वसम्भवाभावात्
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यं । ९ ।

असदकरणान्नसदसदसतोऽकरणं तस्मात्सत्कार्य्यं इहलोकेऽसत्करणं नास्ति यथा सिकताभ्यस्तैलोत्पत्तिस्तस्मात्सतः करणादस्ति प्रागुत्पत्तेः । प्रधानेव्य क्तमतः सत्कार्य्यं । किं चान्यदुपादानग्रहणादुपादानं कारणं तस्यग्रहणा दिहलोके यो येनार्थी स तदुपादानग्रहणं करोति दध्यर्थी क्षीरस्य न तु जलस्य तस्मात् सत्कार्य्यं । इतश्च सर्व्वसम्भवाभावात् सर्व्वस्य सर्व्वत्रसम्भवो नास्ति यथा सुवर्णस्य रजतादौ तृणपांशुसिकतासु तस्मात् सर्व्वसम्भवाभा वात् सत्कार्य्यं । इतश्च शक्तस्य शक्यकरणात् । इह कुलालः शक्तो मृद्दण्ड

चक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति तस्मात् सत्कार्य्यं । इतश्च कारणभावाच्च सत्कार्य्यं । कारणं यल्लक्षणं तल्लक्षणमेव कार्य्यमेव यथा यवेभ्योऽपि यवाः व्रीहीभ्यो व्रीहयः यदाऽसत्कार्य्यं स्यात्ततः कोद्रवेभ्यः शालयः स्युर्न च सन्तीति तस्मात् सत्कार्य्यं । एवं पञ्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्ति तस्मात्सत उत्पत्तिर्नासत इति ॥ प्रकृतिविरूपं सरूपं च यदुक्तं तत् कथमित्युच्यते ।

---

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तं । १० ।

---

व्यक्तं महदादिकार्य्यं हेतुमदिति हेतुरस्यास्ति हेतुमत् । उपादानं हेतुः कारणं निमित्तमिति पर्य्यायाः । व्यक्तस्य प्रधानं हेतुरस्ति अतो हेतुमद्व्यक्तं भूतपर्य्यन्तं हेतुमद्बुद्धितत्वं प्रधानेन हेतुमानहंकारो बुद्ध्या पञ्चतन्मात्राणि एकादशेन्द्रियाणि हेतुमन्त्यहंकारेण । आकाशं शब्दतन्मात्रेण हेतुमत् । वायुः स्पर्शतन्मात्रेण हेतुमान् । तेजो रूपतन्मात्रेण हेतुमत् । आपो रसतन्मात्रेण हेतुमत्यः । पृथिवी गन्धतन्मात्रेण हेतुमती । एवं भूतपर्य्यन्तं व्यक्तं हेतुमत् ॥ किं चान्यदनित्यं यस्मादन्यस्मादुत्पद्यते यथा मृत्पिण्डादुत्पद्यते घटः स चानित्यः ॥ किं चाव्याप्यसर्व्वगमित्यर्थः यथा प्रधानपुरुषौ सर्व्वगतौ नैव व्यक्तं ॥ किंचान्यत् सक्रियं संसारकाले संसरति त्रयोदशविधेन करणेन संयुक्तं सूक्ष्मं शरीरमाश्रित्य संसरति तस्मात् सक्रियं ॥ किंचान्यदनेकं बुद्धिरहंकारः पञ्चतन्मात्राण्येकादशेन्द्रियाणि च पञ्चमहाभूतानि तन्मात्राश्रितानि॥ किंच लिङ्गं लययुक्तं लयकाले पञ्चमहाभूतानि तन्मात्रेषु लीयन्ते तान्येकादशेन्द्रियैः सहाहंकारे स च बुद्धौ सा च प्रधाने लयं यातीति ॥ तथा सावयवं अवयवाः शब्दस्पर्शरसरूपगन्धाः तैः सह ॥ किंच परतन्त्रं नात्मनः प्रभवति यथा प्रधानतन्त्रा बुद्धिः बुद्धितन्त्रोऽहंकारः अहंकारतन्त्राणि

तन्मात्राणीन्द्रियाणि च तन्मात्रतत्त्वाणि पञ्चमहाभूतानिच । एवं परतन्त्वं परायत्तं व्याख्यातं व्यक्तं ॥ अथोऽव्यक्तं व्याख्यामः । विपरीतमव्यक्तं । एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तं हेतुमद्यक्तमुक्तं । नहिप्रधानात् परं किञ्चिदस्ति यतः प्रधानस्यानुत्पत्तिः तस्मादहेतुमदव्यक्तं । तथानित्यं च व्यक्तं नित्यमव्यक्तमनुत्पाद्यत्वात् नहि भूतानि कुतश्चिदुत्पद्यन्तेति प्रधानं ॥ किं चाव्यापि व्यक्तं व्यापि प्रधानं सर्व्वगतत्वात् ॥ सक्रियं व्यक्तमक्रियमव्यक्तं सर्व्वगतत्वादेव ॥ तथाऽनेकं व्यक्तमेकं प्रधानं कारणत्वात् त्रयाणां लोकानां प्रधानमेकं कारणं तस्मादेकं प्रधानं ॥ तथाश्रितं व्यक्तमनाश्रितमव्यक्तमकार्य्यत्वान्नहि प्रधानात्किंचिदस्ति परं यस्य प्रधानं कार्य्यं स्यात् ॥ तथा व्यक्तं लिङ्गमलिङ्गमव्यक्तं नित्यत्वान्महदादि लिङ्गं प्रलयकाले परस्परं प्रलीयते नैवं प्रधानं तस्मादलिङ्गं प्रधानं ॥ तथा सावयवं व्यक्तं निरवयवमव्यक्तं नहि शब्दस्पर्शरसरूपगन्धाः प्रधाने सन्ति ॥ तथा परतन्त्वं व्यक्तं स्वतन्त्वमव्यक्तं प्रभवत्यात्मनः ॥ एवं व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं साधर्म्यमुच्यते यदुक्तं सरूपं च ।

---

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्म्मि
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ।११।

---

त्रिगुणं व्यक्तं सत्वरजस्तमांसि त्रयो गुणा यस्येति । अविवेकि व्यक्तं नविवेकोऽस्यास्तीति । इदं व्यक्तमिमे गुणा इति न विवेककर्त्तुं याति अयं गौरयमश्व इति यथा ये गुणास्तद्यक्तं यद्यक्तं ते च गुणा इति । तथा विषयो व्यक्तं भोज्यमित्यर्थः सर्व्वपुरुषाणां विषयभूतत्वात् । तथा सामान्यं व्यक्तं मूल्यदासीवत् सर्व्वसाधारणत्वात् ॥ अचेतनं व्यक्तं सुखदुःखमोहान्न चेतयतीत्यर्थः ॥ तथा प्रसवधर्म्मि व्यक्तं तद्यथा बुद्धेरहंकारः प्रसूयते तस्मात् पञ्चतन्मात्राणि एकादशेन्द्रियाणि च प्रसूयन्ते तन्मात्रेभ्यः पञ्चमहाभूतानि ॥ एव

मेते व्यक्तधर्म्माः प्रसवधर्म्मान्ता उक्ता एवमेभिरव्यक्तं सरूपं यथा व्यक्तं तथा प्रधानमिति । तत्त्रिगुणं व्यक्तमव्यक्तमपि त्रिगुणं यस्यैतन्महदादि कार्य्यं त्रिगुणं । इह यदात्मकं कारणं तदात्मकं कार्य्यमिति यथा कृष्णतन्तु कृतः कृष्ण एव पटो भवति ॥ तथाविवेकि व्यक्तं प्रधानमपि गुणैर्नभिद्यते अन्येगुणा अन्यत् प्रधानमेव विवेक्तुं न याति तदविवेकि प्रधानं ॥ तथा विषयो व्यक्तं प्रधानमपि सर्व्वपुरुषविषयभूतत्वाद्विषय इति ॥ तथा सामान्यं व्यक्तं प्रधानमपि सर्व्वसाधारणत्वात् ॥ तथाऽचेतनं व्यक्तं प्रधानमपि सुखदुः खमोहान्नचेतयतीति कथमनुमीयत इह ह्यचेतनान्मृत्पिण्डादचेतनो घट उत्प द्यते ॥ एवं प्रधानमपि व्याख्यातं ॥ इदानीन्तद्विपरीतस्तथा पुमानित्येत द्व्याख्यायते । तद्विपरीतस्ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतः पुमान् । तद्यथा त्रिगुणं व्यक्तमव्यक्तं चागुणः पुरुशः । अविवेकि व्यक्तमव्यक्तं च विवेकी पुरुषः । तथा विषयो व्यक्तमव्यक्तं चाविषयः पुरुषः । तथा सामान्यं व्यक्त मव्यक्तं चासामान्यः पुरुषः । अचेतनं व्यक्तमव्यक्तं च चेतनः पुरुषः सुखदुः खमोहांश्चेतयति संजानीते तस्माच्चेतनः पुरुष इति । प्रसवधर्म्मि व्यक्तं प्रधानंचाप्रसवधर्म्मी पुरुषो नहि किञ्चित् पुरुषात् प्रसूयते । तस्मादुक्तं तद्विपरीतः पुमानिति ॥ तदुक्तं तथा च पुमानिति । तत् पूर्व्वस्यामार्य्यायां प्रधानमहेतुमद्यथा व्याख्यातं तथा च पुमान् तद्यथा हेतुमदनित्यमित्यादि व्यक्तं तद्विपरीतमव्यक्तं तत्त्वहेतुमद्व्यक्तमहेतुमत् प्रधानं तथा च पुमानहेतु माननुत्पाद्यत्वात् । अनित्यं व्यक्तं नित्यं प्रधानं तथा च नित्यः पुमान् । अक्रियः सर्व्वगतत्वादेव । अनेकं व्यक्तमेकमव्यक्तं तथा पुमानप्येकः । आ श्रितं व्यक्तमनाश्रितमव्यक्तं तथा च पुमाननाश्रितः । लिङ्गं व्यक्तमलिङ्गं प्रधानं तथा च पुमानप्यलिङ्गः । न क्वचिल्लीयत इति । सावयवं व्यक्तं नि रवयवमव्यक्तं तथा च पुमान् निरवयवः । नहि पुरुषे शब्दादयोऽवयवाः सन्ति । किंच परतन्त्रं व्यक्तं स्वतन्त्रमव्यक्तं तथा च पुमानपि स्वतन्त्रः । आत्मनः प्रभवतीत्यर्थः । एवमेतदव्यक्तपुरुषयोः साधर्म्म्यं व्याख्यातं पूर्व्व स्यामार्य्यायां । व्यक्तप्रधानयोः साधर्म्म्यं पुरुषस्य वैधर्म्म्यं च त्रिगुणमविवे

कीत्यादि प्रकृत्यार्य्यायां व्याख्यातं। तत्रयदुक्तं त्रिगुणमिति व्यक्तमव्यक्तं च तत् के ते गुणा इति तत् स्वरूपप्रतिपादनायेदमाह।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्चगुणाः ।१२।

प्रीत्यात्मका अप्रीत्यात्मकाः विषादात्मकाश्चगुणाः सत्वरजस्तमांसीत्यर्थः। तत्र प्रीत्यात्मकं सत्वं प्रीतिः सुखं तदात्मकमिति। अप्रीत्यात्मकं रजः। विषादात्मकं तमः। विषादो मोहः। तथा प्रकाशप्रवृत्ति नियमार्थाः। अर्थः शब्दः सामर्थ्यवाची प्रकाशार्थं सत्वं प्रकाशसमर्थमित्यर्थः। प्रवृत्त्यर्थं रजो नियमार्थं तमः स्थितौ समर्थमित्यर्थः प्रकाशक्रियास्थितिशीला गुणा इति। तथाऽन्योऽन्याभिवाश्रयजननमिथुनवृत्तयश्च। अन्योऽन्याभिमवाः अन्योऽन्याश्रयाः अन्योऽन्यजननाः अन्योऽन्यमिथुनाः अन्योऽन्यवृत्तयश्च ते तथोक्ताः। अन्योऽन्याभिभवा इति अन्योऽन्यं परस्परमभिभवन्तीति प्रीत्यप्रीत्यादिभिर्धर्म्मैराविर्भवन्ति यथा यदा सत्वमुत्कटं भवति तदा रजस्तमसी अभिभूय स्वगुणैः प्रीतिप्रकाशात्मकेनावतिष्ठते यदा रजस्तदा सत्वतमसी अप्रीतिप्रवृत्तिधर्म्मेण यदा तमस्तदा सत्वरजसी विषादस्थित्यात्मकेन इति। तथाऽन्योऽन्याश्रयाश्च द्व्यणुकवद्गुणाः। अन्योऽन्यजननाः यथा मृत्पिण्डो घटं जनयति। तथाऽन्योऽन्यमिथुनाश्च यथा स्त्रीपुंसौ अन्योऽन्यमिथुनौ तथा गुणाः। उक्तं च

रजसो मिथुनं सत्वं सत्वस्य मिथुनं रजः
उभयोः सत्वरजसोर्मिथुनं तम उच्यते

परस्परसहाया इत्यर्थः। अन्योऽन्यवृत्तयश्च परस्परं वर्त्तन्ते गुणाः गुणेषु वर्त्तन्त इति वचनात्। यथा सुरूपा सुशीला स्त्री सर्व्वसुखहेतुः सपत्नीनां सैव दुःखहेतुः सैव रागिणां मोहं जनयति एव सत्वंरजस्तमसोर्वृत्तिहेतु

यथा राजा सदोद्युक्तः प्रजापालने दुष्टनिग्रहे शिष्टानां सुखमुत्पादयति दुष्टानां दुःखं मोहं च एवं रजस्सत्वमसो र्वृत्तिं जनयति । तथा तमः स्वरूपेणावरणात्मकेन सत्वरजसो र्वृत्तिं जनयति यथा मेघाः खमावृत्य जगतः सुखमुत्पादयन्ति ते वृष्ट्या कर्षुकाणां कर्षणोद्योगं जनयन्ति विरहिणां मोहमेवमन्योऽन्यवृत्तयो गुणाः । किंचान्यत् ।

सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः । १३ ।

सत्वं लघु प्रकाशकंच यदा सत्वमुत्कटं भवति तदा लघून्यङ्गानि बुद्धिप्रकाशश्च प्रसन्नतेन्द्रियाणां भवति । उपष्टम्भकं चलं च रजः उपष्टभ्नातीत्युपष्टम्भकमुद्योतकं यथा वृषो वृषदर्शने उत्कटमुपष्टम्भं करोति एव रजोवृत्तिः । तथा रजश्च चलं दृष्टं रजोवृत्तिश्चलचित्तो भवति । गुरुवरणकमेव तमः यदा तम उत्कटं भवति तदा गुरूण्यङ्गान्यावृतानीन्द्रियाणि भवन्ति स्वार्थासमर्थानि । अत्राह यदि गुणाः परस्परं विरुद्धाः स्वमतेनैव कमर्थं निष्पादयन्ति तर्हि कथं प्रदीपवच्चार्थतो वृत्तिः प्रदीपेन तुल्यं प्रदीपवदर्थतः साधना वृत्तिरिष्टा यथा प्रदीपः परस्परविरुद्धतैलाग्निवर्त्तिसंयोगादर्थप्रकाशं जनयति एवं सत्वरजस्तमांसि परस्परं विरुद्धान्यर्थं निष्पादयन्ति । अन्तरप्रश्नो भवति त्रिगुणमविवेकिविषय इत्यादि प्रधानं व्यक्तं च व्याख्यातं तत्र प्रधानमुपलभ्यमानं महदादि च त्रिगुणमविवेक्यादीति च कथमवगम्यते तत्राह ।

अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्य्ययाभावात्
कारणगुणात्मकत्वात् कार्य्यस्याव्यक्तमपिसिद्धं । १४ ।

योऽयमविवेक्यादिर्गुणः स त्रैगुण्यान्महदादौऽव्यक्तेनायं सिद्ध्यति । अत्रोच्यते तद्विपर्य्ययाभावात्तस्य विपर्य्ययस्तद्विपर्य्ययस्तस्याभावस्तद्विपर्य्ययाभावस्तस्मात् सिद्धमव्यक्तं । यथा यत्रैवतन्तवस्तत्रैव पटः अन्ये तन्तवोऽन्यः पटो न कुतस्तद्विपर्य्ययाभावात् । एवं व्यक्ताव्यक्तसम्पन्नो भवति दूरं प्रधानमासन्नं व्यक्तं यो व्यक्तं पश्यति स प्रधानमपिपश्यति तद्विपर्य्ययाभावात् । इतश्चाव्यक्तं सिद्धं कारणगुणात्मकत्वात् कार्य्यस्य । लोके यदात्मकं कारणं तदात्मकं कार्य्यमपि तथा कृष्णेभ्यस्तन्तुभ्यः कृष्ण एव पटो भवति । एवं महदादिलिङ्गमविवेकिविषयः सामान्यमचेतनं प्रसवधर्म्मि यदात्मकं लिङ्गं तदात्मकमव्यक्तमपि सिद्धं । त्रैगुण्यादविवेक्यादिर्व्यक्ते सिद्धस्तद्विपर्य्ययाभावात् एवं कारणगुणात्मकत्वात् कार्य्यस्याव्यक्तमपि सिद्धमित्येतन्मिथ्या लोके यन्नोपलभ्यते तन्नास्ति एवं प्रधानमप्यस्ति किं तु नोपलभ्यते ।

भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च
कारणकार्य्यविभागादविभागाद्वैश्वरूपस्य । १५ ।

कारणमस्त्यव्यक्तमितिक्रियाकारकसम्बन्धः । भेदानां परिमाणाल्लोके यत्रकर्त्तास्ति तस्य परिमाणं दृष्टं यथा कुलालः परिमितैर्मृत्पिण्डैः परिमितानेवघटान् करोति एवं महदपि महदादिलिङ्गं परिमितं भेदतः प्रधानकार्य्यमेका बुद्धिरेकोऽहंकारः पञ्च तन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानीत्येवं भेदानां परिमाणादस्ति प्रधानं कारणं यद्व्यक्तं परिमितमुत्पादयति । यदि प्रधानं न स्यात्तदा निःपरिमाणमिदं व्यक्तमपि न स्यात् परिमाण

च्चभेदानामस्ति प्रधानं यस्माद्व्यक्तमुत्पन्नं । तथा समन्वयादिहलोके प्रसि
द्धिर्दृष्टा यथा व्रतधारिणं वटुं दृष्ट्वा समन्वयति नूनमस्य पितरौ ब्राह्मणा
विति एवमिदं त्रिगुणं महदादिलिङ्गं दृष्ट्वा साधयामोऽस्य यत् कारणं भवि
ष्यतीति अतः समन्वयादस्तिप्रधानं। तथा शक्तितः प्रवृत्तेश्च इह यो यस्मिन्
शक्तः स तस्मिन्नेवार्थे प्रवर्त्तते यथा कुलालो घटस्य करणे समर्थो घटमेव
करोति न पटं रथं वा । तथास्ति प्रधानं कारणं कुतः कारणकार्य्यविभा
गात् । करोतीतिकारणं । क्रियत इति कार्य्यं । कारणस्य कार्य्यस्य च वि
भागो यथा घटो दधिमधूदकपयसां धारणे समर्थो न तथा तत्कारणं मृत्पि
ण्डः । मृत्पिण्डो वा घटं निष्पादयति न चैवं घटो मृत्पिण्डं । एवं महदादि
लिङ्गं दृष्ट्वानुमीयते । अस्ति विभक्तं तत् कारणं यस्य विभाग इदं व्यक्त
मिति । इतश्च अविभागाद्वैश्वरूपस्य विश्वं जगत् तस्य रूपं व्यक्तिः । विश्व
रूपस्य भावो वैश्वरूपं तस्याविभागादस्तिप्रधानं यस्मात्त्रैलोक्यस्य पञ्चा
नां पृथिव्यादीनां महाभूतानां परस्परं विभागो नास्ति महाभूतेष्वन्तर्भूता
स्त्रयो लोकाः इति पृथिव्यापस्तेजोवायुराकाशमिति एतानि पञ्चमहाभूता
नि प्रलयकाले सृष्टिक्रमेणैवाविभागं यान्ति तन्मात्रेषु परिणामिषु तन्मा
त्राण्येकादशेन्द्रियाणि चाहंकारे अहंकारो बुद्धौ बुद्धिः प्रधाने एवं त्रयो
लोकाः प्रलयकाले प्रकृतावविभागं गच्छन्ति तस्मादविभागात् क्षीरदधि
वद्व्यक्ताव्यक्तयोरस्त्यव्यक्तं कारणं । अतश्च ।

---

कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् । १६ ।

---

अव्यक्तं प्रख्यातं कारणमस्ति यस्मान्महदादिलिङ्गं प्रवर्त्तते । त्रिगुणतः त्रि
गुणात् सत्वरजस्तमोगुणा यस्मिन् तत्त्रिगुणं तत्किमुक्तं भवति; सत्वरजस्त
मसां साम्यावस्था प्रधानं । तथा समुदयात् यथा गंगास्रोतांसि त्रीणि रुद्र

मूर्द्धनि पतितानि एकं श्रोतो जनयंति एव त्रिगुणमव्यक्तमेकं व्यक्तं जनयति तथा वा तन्तवः समुदिताः पटं जनयन्ति एवमव्यक्तं गुणसमुदयान्महदादि जनयतीति त्रिगुणतः समुदयाच्च व्यक्तं जगत् प्रवर्त्तते । यस्मादेकस्मात् प्रधानाद्व्यक्तं तस्मादेकरूपेणभवितव्यं । नैषदोषः परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषादेकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नास्तुल्यभावा न भवन्ति देवाः सुखेनयुक्ता मनुष्या दुःखेन तिर्य्यञ्चो मोहेन एकस्मात् प्रधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवद्भवति। प्रतिप्रतीति वीप्सा। गुणानामाश्रयो गुणाश्रयस्तद्विशेषस्तं गुणाश्रयविशेषं प्रतिनिधाय प्रतिप्रतिगुणाश्रयविशेषं परिणामात् प्रवर्त्तते व्यक्तं यथा आकाशादेकरसं सलिलं पतितं नानारूपात्संश्लेषाद्भिद्यते तद्रसान्तरैरेवमेकस्मात् प्रधानात् प्रवृत्तास्त्रयो लोका नैकस्वभावा भवन्ति देवेषु सत्वमुत्कटं रजस्तमसी उदासीने तेन तेऽत्यंन्तसुखिनो मनुष्येषु रज उत्कटं भवति सत्वतमसी उदासीने तेन तेऽत्यन्तदुःखिनस्तिर्य्यक्षु तम उत्कटं भवति सत्वरजसी उदासीने तेन तेऽत्यन्तमूढाः ॥ एवमार्याद्वयेन प्रधानस्यास्तित्वमियमुपगम्यते इतश्चोत्तरं पुरुषास्तित्वप्रतिपादनार्थमाह ।

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्य्ययादधिष्ठानात्
पुरुषोऽस्तिभोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च । १७ ।

यदुक्तं व्यक्ताव्यक्तविज्ञानान्मोक्षः प्राप्यत इति तत्रव्यक्तादनन्तरमव्यक्तं पञ्चभिः कारणैरधिगतमव्यक्तवत् पुरुषोऽपि सूक्ष्मस्तस्याऽधुनानुमितास्तित्वं प्रति क्रियते । अस्ति पुरुषः कस्मात् संघातपरार्थत्वात् । योऽयं महदादि संघातः सपुरुषार्थ इत्यनुमीयते अचेतनत्वात् पर्य्यङ्कवत् । यथा पर्य्यङ्कः प्रत्येकं गात्रोत्पलकपादवटतूलीप्रच्छादनपटोपधानसङ्घातः परार्थो नहि स्वार्थः पर्य्यङ्कस्य नहि किञ्चिदपि गात्रोत्पलाद्यवयवानां परस्परं कृत्यमस्ति।

अतोऽवगम्यतेऽस्ति पुरुषो यः पर्य्यङ्के शेते यस्यार्थं पर्य्यङ्कस्तत्परार्थमिदं शरीरं पञ्चानां महाभूतानां सङ्घातो वर्त्ततेऽस्ति पुरुषो यस्येदं भोग्यशरीरं भोग्यं महदादिसङ्घातरूपं समुत्पन्नमिति। इतश्चात्माऽस्ति त्रिगुणादिविपर्य्ययात्। यदुक्तं पूर्व्वस्यामार्य्यायां त्रिगुणमविवेकिविषय इत्यादि। तस्माद्विपर्य्ययाद्येनोक्तं तद्विपरीतस्तथा पुमान्। अधिष्ठानाद्यथेह लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाऽधिष्ठितः प्रवर्त्तते तथात्माऽधिष्ठानाच्छरीरमिति। तथा चोक्तं षष्टितन्त्रे पुरुषाधिष्ठितं प्रधानं प्रवर्त्तते। अतोऽस्यात्मा भोक्तृत्वात्। यथा मधुराम्ललवणकटुतिक्तकषायषड्रसोपबृंहितस्य संयुक्तस्यान्नस्य साध्यते एवं महदादिलिङ्गस्य भोक्तृत्वाभावादस्ति स आत्मा यस्येदं भोग्यं शरीरमिति। इतश्च कैवल्यार्थं प्रवृत्तेश्च केवलस्य भावः कैवल्यं तन्निमित्तं या च प्रवृत्तिस्तस्याः स्वकैवल्यार्थं प्रवृत्तेः सकाशादनुमीयते अस्त्यात्मेति यतो सर्व्वो विद्वानविद्वांश्च संसारसन्तानक्षयमिच्छति। एवमेभिर्हेतुभिरस्त्यात्मा शरीराद्व्यतिरिक्तः। अथ सः किमेकः सर्व्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत् आहोस्विद्बहव आत्मानः प्रतिशरीरमधिष्ठातार इत्यत्रोच्यते।

---

जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव। १८।

---

जन्म च मरणं च करणानि च जन्ममरणकरणानि तेषां प्रतिनियमात् प्रत्येकनियमादित्यर्थः। यद्येक एव आत्मा स्यात्तत एकस्य जन्मनि सर्व्व एव जायेरन् एकस्य मरणे सर्व्वेऽपि म्रियेरन् एकस्य करणवैकल्ये बाधिर्य्यान्धत्वमूकत्वकुणित्वखंजत्वलक्षणे सर्व्वेऽपि बधिरान्धकुणिखंजाःस्युर्न चैवं भवति तस्माज्जन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धं। इतश्चायुगपत् प्रवृत्तेश्च युगपदेककालं न युगपदयुगपत् प्रवर्त्तनं यस्मादयुगपद्धर्म्मादिषु प्रवृत्तिर्दृश्यते एके धर्म्मे प्रवृत्ता अन्येऽधर्म्मे वैराग्येऽन्ये ज्ञानेऽन्ये प्रवृत्ताः

तस्मादयुगपत् प्रवृत्तेश्च बहव इति सिद्धं ॥ किञ्चान्यत्त्रैगुण्यविपर्य्ययाच्चैव त्रिगुणभावविपर्य्ययाच्च पुरुषबहुत्वं सिद्धं। यथा सामान्ये जन्मनि एकः सात्त्विकः सुखी। अन्यो राजसो दुःखी। अन्यस्तामसो मोहवान्। एवं त्रैगुण्यविपर्य्ययाद्बहुत्वं सिद्धमिति। अकर्त्ता पुरुष इत्येतदुच्यते।

---

तस्माच्च विपर्य्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ।१९।

---

तस्माच्चविपर्य्यासात्तस्माच्च यथोक्तत्रैगुण्यविपर्य्यासाद्विपर्य्ययान्निर्गुणः पुरुषो विवेकी भोक्तेत्यादिगुणानां पुरुषस्य यो विपर्य्यास उक्तस्तस्मात् सत्वरजस्तमःसु कर्तृभूतेषु साक्षित्वं सिद्धं पुरुषस्येति योऽयमधिकृतो बहुत्वं प्रति। गुणा एव कर्त्तारः प्रवर्त्तन्ते साक्षी न प्रवर्त्तते नापि निवर्त्तत एव। किं चान्यत् कैवल्यं केवलभावः कैवल्यमन्यत्वमित्यर्थः। त्रिगुणेभ्यः केवलः। अन्यन्माध्यस्थ्यं मध्यस्थभावः परिव्राजकवत् मध्यस्थः पुरुषः। यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थः पुरुषोऽप्येवं गुणेषु वर्त्तमानेषु न प्रवर्त्तते। तस्माद्द्रष्टृत्वमकर्तृभावश्च यस्मान्मध्यस्थस्तस्माद्द्रष्टा तस्मादकर्त्ता पुरुषस्तेषां कर्म्मणामिति सत्वरजस्तमांसि त्रयो गुणाः कर्म्मकर्तृभावेन प्रवर्त्तन्ते न पुरुष एवं पुरुषस्यास्तित्वं च सिद्धं। यस्मादकर्त्ता पुरुषस्तत्कथमध्यवसायं करोति धर्म्मं करिष्याम्यधर्म्मं न करिष्यामीत्यतः कर्त्ता भवति न च कर्त्ता पुरुष एवमुभयथा दोषः स्यादिति। अत उच्यते।

---

तस्मात्तत् संयोगादचेतनं चेतनावदिव लिङ्गं
गुणकर्त्तृत्वे च तथा कर्त्तेव भवतीत्युदासीनः । २० ।

इह पुरुषश्चेतनाकृत् तेन चेतनावभासं युक्तं महदादिलिङ्गं चेतनावदिवभवति यथा लोके घटः शीतसंयुक्तः शीतः उष्णसंयुक्त उष्ण एवं महदादि लिङ्गं तस्य संयोगात् पुरुषसंयोगाच्चेतनावदिवभवति तस्माद्गुणा अध्यवसायं कुर्वन्ति न पुरुषः । यद्यपि लोके पुरुषः कर्त्तागंतेत्यादि प्रयुज्यते तथाप्यकर्त्ता पुरुषः कथं गुणकर्त्तृत्वे च तथा कर्त्तेव भवत्युदासीनः गुणानां कर्त्तृत्वे सति उदासीनोऽपि पुरुषः कर्त्तेव भवति न कर्त्ता । अत्र दृष्टान्तो भवति यथाऽचौरश्चौरैः सह गृहीतश्चौर इत्यवगम्यत एवं त्रयो गुणाः कर्त्तारस्तैः संयुक्तः पुरुषोऽकर्त्ताऽपि कर्त्ता भवति कर्त्तृसंयोगात् । एवं व्यक्ताव्यक्तज्ञानां विभागो विख्यातो यद्विभागान्मोक्षप्राप्तिरिति । अथैतयोः प्रधानपुरुषयोः किं हेतुः संघात उच्यते ।

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य
पङ्ग्वन्धवदुभयोरपि संयोगस्तत् कृतः सर्गः । २१ ।

पुरुषस्य प्रधानेन सह संयोगो दर्शनार्थं प्रकृतिं महदादिकार्य्यभूतपर्य्यन्तं पुरुषः पश्यति एतदर्थं प्रधानस्यापि पुरुषेण संयोगः। कैवल्यार्थं स च संयोगः पंगृन्धवदुभयोरपि द्रष्टव्यः यथा एकः पंगुरेकश्चान्ध एतौद्वावपि गच्छन्तौ महतासामर्थ्येनाटव्यां सार्थस्य स्तेनकृतादुपप्लवात् स्वबन्धुपरित्यक्तौ दैवादितश्चेरुश्चस्वगत्या च तौ संयोगमुपयातौ पुनस्तयोः स्ववचसो विश्वस्तत्वेन संयोगो गमनार्थं दर्शनार्थं च भवत्यन्धेन पंगुः स्कन्धमारोपितः एव शरीरारूढपंगुदर्शितेन मार्गेणान्धो याति पंगुश्चान्धस्कन्धारूढः । एवं पुरुषे दर्श

नशक्तिरस्ति पंगुवन्नक्रिया प्रधाने क्रियाशक्तिरस्त्यन्धवन्नदर्शनशक्तिः । यथा वानयोः पंग्वन्धयोः कृतार्थयोर्विभागो भविष्यतीप्सितस्थानप्राप्तयोरेवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्त्तते पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति तयोः कृतार्थयोर्विभागो भविष्यति । किं चान्यत् तत्कृतः सर्गस्तेन संयोगेन कृतस्तत्कृतः सर्गस्सृष्टिः । यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्तिः । इदानीं सर्व्वविभागदर्शनार्थमाह ।

प्रकृतेर्महान्स्ततोऽहंकारस्तस्माद्गणश्चषोडशकः
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि । २२ ।

प्रकृतिः प्रधानं ब्रह्म अव्यक्तं बहुधानकं मायेति पर्य्यायाः । अलिङ्गस्य प्रकृतेः सकाशान्महानुत्पद्यते महान् बुद्धिरासुरी मतिः ख्यातिर्ज्ञानं प्रज्ञापर्य्यायैरुत्पद्यते तस्माच्चमहतोऽहंकार उत्पद्यतेऽहंकारो भूतादिर्वैकृतस्तैजसोभिमान इति पर्य्यायाः तस्माद्गणश्चषोडशकः तस्मादहंकाराच्छोडशकःषोडशस्वरूपेणगण उत्पद्यते । स यथा । पञ्चतन्माचाणि शब्दतन्माचं स्पर्शतन्माचं रूपतन्माचं रसतन्माचं गन्धतन्माचमिति । तन्माचसूक्ष्मपर्य्यायवाच्यानि । तत एकादशेन्द्रियाणि श्रोचं त्वक् चक्षुषी जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि । वाक् पाणिपादपायूपस्थाः पञ्चकर्म्मेन्द्रियाण्युभयात्मकमेकादशं मन एषः षोडशको गणोऽहंकारादुत्पद्यते । किंच पञ्चभ्यः पञ्चभूतानि तस्माच्छोडशकाद्गणात् पञ्चभ्यस्तन्माचेभ्यः सकाशात् पञ्च वै महाभूतान्युत्पद्यन्ते । यदुक्तं शब्दतन्माचादाकाशं स्पर्शतन्माचाद्वायुः रूपतन्माचात्तेजः रसतन्माचादापः गन्धतन्माचात् पृथिवी एवं पञ्चभ्यः परमाणुभ्यः पञ्चमहाभूतान्युत्पद्यन्ते । यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष इति तच महदादिभूतान्तं चयोविंशतिभेदं व्याख्यातमव्यक्तमपि भेदानां परिमाणादित्यादिना व्याख्यातं पुरुषोऽपि संघातपरार्थत्वादित्यादिभिर्हेतुभिर्व्याख्यातः । एवमेतानि पञ्चविंशति तत्वा

नि यस्त्रैलोक्यं व्याप्तं जानाति तस्य भावोऽस्तित्वं तत्वं यचोक्तं। पञ्चविंशति तत्वज्ञो यत्रतत्राश्रमेरतः। जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः। तानि यथा प्रकृतिः पुरुषो बुद्धिरहंकारः पञ्चतन्मात्रा एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येतानि पञ्चविंशति तत्वानि। तत्रोक्तं प्रकृतेर्महानुत्पद्यते तस्य महतः किं लक्षणमित्येतदाह।

---

अध्यवसायो बुद्धिर्धर्म्मो ज्ञानं विराग ऐश्वर्य्यं
सात्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तं। २३।

अध्यवसायो बुद्धिलक्षणं। अध्यवसनमध्यवसायः यथा वीजे भविष्यद्वृत्तिकोऽङ्कुरस्तद्वदध्यवसायोऽयंघटोऽयंपट इत्येवं स्यति या सा बुद्धिरितिलक्ष्यते सा च बुद्धिरष्टाङ्गिका सात्विकतामसरूपभेदात् तत्र बुद्धेः सात्विकं रूपं चतुर्विधं भवति धर्म्मो ज्ञानं वैराग्यमैश्वर्य्यं चेति तत्र धर्म्मो नाम दया दान यम नियमलक्षणस्तत्रयमानियमाश्च पातञ्जलेऽभिहिता अहिंसा सत्यास्तेय ब्रह्मचर्य्यापरिग्रहा यमाः शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानियमाः। ज्ञानं प्रकाशोऽवगमो भानमिति पर्य्यायास्तच्चद्विविधं बाह्यमाभ्यन्तरं चेति। तत्र बाह्यं नाम वेदाः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषाख्यषडङ्गसहिताः पुराणानि न्यायमीमांसाधर्म्मशास्त्राणि चेति। आभ्यन्तरं प्रकृतिपुरुषज्ञानमियं प्रकृतिः सत्वरजस्तमसां साम्यावस्थाऽयं पुरुषः सिद्धो निर्गुणोव्यापी चेतन इति। तत्र बाह्यज्ञानेन लोकपंक्तिर्लोकानुराग इत्यर्थः। आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः। वैराग्यमपि द्विविधं बाह्यमाभ्यन्तरंच बाह्यं दृष्टविषयवैतृष्ण्यमर्जनरक्षणक्षयसंगहिंसादोषदर्शनात् विरक्तस्याभ्यन्तरं प्रधानमप्यत्रस्वप्नेन्द्रजालसदृशमिति विरक्तस्य मोक्षेप्सोर्यदुत्पद्यते तदाभ्यन्तरं वैराग्यं। ऐश्वर्य्यमीश्वरभावस्तच्चाष्टगुणमणिमा महिमा गरिमा लघिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्रकामावसायित्वं चेति। अणोर्भा

वोऽणिमा सूक्ष्मो भूत्वा जगति विचरतीति। महिमा महान् भूत्वा विचरतीति। लघिमा मृणालीतूलावयवादपि लघुतया पुष्पकेसराग्रेष्वपि तिष्ठति। प्राप्तिरभिमतं वस्तु यत्र तत्रावस्थितः प्राप्नोति। प्राकाम्यं प्रकामतो यदेवेषति तदेव विदधाति। ईशित्वं प्रभुतया त्रैलोक्यमपीष्टे। वशित्वं सर्वं वशीभवति। यत्रकामावसायित्वं ब्रह्मादिस्तम्बपर्य्यन्तं यत्र कामस्तत्रैवास्य स्वेच्छया स्थानासनविहारानाचरतीति। चत्वार एतानि बुद्धेः सात्विकानि रूपाणि यदा सत्वेन रजस्तमसी अभिभूते तदा पुमान् बुद्धिगुणान् धर्म्मादीनाप्नोति। किंचान्यत् तामसमस्माद्विपर्य्यस्तमस्माद्धर्म्मादेर्विपरीतं तामसं बुद्धिरूपं तत्र धर्म्माद्विपरीतोऽधर्म्म एवमज्ञानमवैराग्यमनैश्वर्यमिति। एवं सात्विकैस्तामसै स्वरूपैरष्टांगा बुद्धिस्त्रिगुणादव्यक्तादुत्पद्यते। एवं बुद्धिलक्षणमुक्तमहंकारलक्षणमुच्यते।

---

अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः
एकादशकश्चगणस्तन्मात्रः पञ्चकश्चैव। २४।

---

एकादशकश्चगण एकादशेन्द्रियाणि तथा तन्मात्रो गणः पञ्चकः पञ्चलक्षणोपेतः शब्दतन्मात्र स्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्रलक्षणोपेतः किं लक्षणात् सर्ग इत्येतदाह।

---

सात्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात्
भूतादेस्तन्मात्रः सतामसस्तैजसादुभयं। २५।

---

सत्वेनाभिभूते यदा रजस्तमसी अहंकारे भवतस्तदा सोऽहंकारः सात्विकस्तस्य च पूर्वाचार्य्यै संज्ञा कृता वैकृत इति तस्माद्विकृतादहंकारादेकादशक इन्द्रि

यगण उत्पद्यते । तस्मात् सात्विकानि विशुद्धानीन्द्रियाणि स्वविषयसम र्थानि तस्मादुच्यते सात्विक एकादशक इति । किंचान्यद्भूतादेस्तन्मात्रः स तामसः तमसाभिभूते सत्वरजसी अहंकारे यदा भवतः सोहंकारस्तामस उच्यते तस्य पूर्व्वाचार्य्यकृता सञ्ज्ञा भूतादिस्तस्माद्भूतादेरहंकारात्तन्मात्रः पञ्चको गण उत्पद्यते भूतानामादिभूतस्तमोबहुलस्तेनोक्तः स तामस इति । तस्माद्भूतादेः पञ्चतन्मात्रको गणः किंच तैजसादुभयं यदा रजसा भिभूते सत्वतमसी भवतस्तदा तस्मात् सोऽहंकारस्तैजस इति संज्ञां लभते तस्मात्तैजसादुभयमुत्पद्यते । उभयमिति एकादशो गणस्तन्मात्रः पंचकः । योऽयं सात्विकोऽहंकारो वैकृतिकोः वैकृतो भूत्वा एकादशेन्द्रियाण्युत्पादयति स तैजसमहंकारं सहायं गृह्णाति सात्विको निःक्रियः स तैजसयुक्त इन्द्रि योत्पत्तौ समर्थः तथा तामसोऽहंकारो भूतादिः सञ्ज्ञितो निःक्रियत्वात्तैजसेना हंकारेण क्रियावता युक्तस्तन्मात्राण्युत्पादयति तेनोक्तं तैजसादुभयमिति एवं तैजसेनाहंकारेणेन्द्रियाण्येकादश पञ्चतन्मात्राणि कृतानि भवन्ति सा त्विक एकादशक इत्युक्तः यो वैकृतात् सात्विकादहंकारादुत्पद्यते तस्य का सञ्ज्ञेत्याह ।

---

बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनस्पर्शनकानि
वाक्पाणिपादपायूपस्थान् कर्म्मेन्द्रियाण्याहुः । २६ ।

---

चक्षुरादीनि स्पर्शनपर्य्यन्तानि बुद्धीन्द्रियाण्युच्यन्ते। स्पृश्यत अनेनेति स्पर्शनं त्वगिन्द्रियं तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति तेनेदं पठ्यते स्पर्शनकानीति शब्दस्पर्शरूपरसगन्धान् पञ्चविषयान् बुध्यन्त अवगच्छन्तीति पञ्च बुद्धी न्द्रियाणि । वाक्पाणिपादपायूपस्थान् कर्म्मेन्द्रियाण्याहुः कर्म्म कुर्व्वन्तीति कर्म्मेन्द्रियाणि । तत्र वाग्वदति हस्तौ नानाव्यापारं कुरुतः पादौ गमना गमनं पायुरुत्सर्गं करोति उपस्थ आनन्दं प्रजोत्पत्या । एवं बुद्धीन्द्रियकर्म्मे

न्द्रियभेदेन दशेन्द्रियाणि व्याख्यातानि मन एकादशकं किमात्मकं किं स्वरूपं चेति तदुच्यते ।

उभयात्मकमत्रमनः संकल्पकमिन्द्रियं च साधर्म्यात्
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ।२७।

अत्रेन्द्रियवर्गे मन उभयात्मकं बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् कर्म्मेन्द्रियेषु कर्म्मेन्द्रियवत् कस्माद्बुद्धीन्द्रियाणां प्रवृत्तिं कल्पयति कर्म्मेन्द्रियाणां च तस्मादुभयात्मकं मनः संकल्पयतीति संकल्पकं। किंचान्यदिन्द्रियं च साधर्म्यात् समानधर्म्मभावात् सात्विकाहंकाराद्बुद्धीन्द्रियाणि कर्म्मेन्द्रियाणि मनसा सहोत्पद्यमानानि मनसः साधर्म्यं प्रति तस्मात्साधर्म्यान्मनोऽपीन्द्रियमेवमेतान्येकादशेन्द्रियाणि सात्विकाद्वैकृतादहंकारादुत्पन्नानि । तत्र मनसः का वृत्तिरिति। संकल्पो वृत्तिः । बुद्धीन्द्रियाणां शब्दादयो वृत्तयः कर्म्मेन्द्रियाणां वचनादयोऽथैतानीन्द्रियाणि भिन्नानि भिन्नार्थग्राहकाणि किमीश्वरेणोत स्वभावेन कृतानि यतः प्रधानबुद्ध्यहंकारा अचेतना पुरुषोऽप्यकर्त्तेत्यत्राह । इह सांख्यानां स्वभावो नाम कश्चित्कारणमस्ति। अत्रोच्यते गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च। इमान्येकादशेन्द्रियाणि शब्दस्पर्शरूपरसगन्धाः पञ्चानां वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां संकल्पश्च मनस एवमेते भिन्नानामेवेन्द्रियाणामर्थाः गुणपरिणामविशेषात् गुणानां परिणामो गुणपरिणामस्तस्य विशेषादिन्द्रियाणां नानात्वं बाह्यार्थभेदाश्च । अथैतन्नानात्वं नेश्वरेण नाहंकारेण न बुद्ध्या नप्रधानेन नपुरुषेण स्वभावात्कृतगुणपरिणामेनेति । गुणानामचेतनत्वान्नप्रवर्त्तते प्रवर्त्तत एव कथं वक्ष्यतीहैववत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य पुरुषस्य विमोक्षार्थं तथा प्रवृत्तिः प्रधानस्य । एवमचेतना गुणा एकादशेन्द्रियभावेन प्रवर्त्तन्ते विशेषोऽपि तत्कृत एव येनोच्चैः प्रदेशे चक्षु खलोकनायस्थितं तथा घ्राणं तथा श्रोत्रं तथा जिह्वा स्वदेशे स्वार्थग्रहणाय । एवं कर्म्मेन्द्रियाण्यपि यथायथं

स्वार्थसमर्थानि स्वदेशावस्थितानि स्वभावतो गुणपरिणामविशेषादेव न तदर्था अपि यत उक्तं शास्त्रान्तरे। गुणा गुणेषु वर्त्तन्ते गुणानां या वृत्तिः सा गुणविषया एवेति बाह्यार्था विज्ञेया गुणकृता एवेत्यर्थः। प्रधानं यस्य कारणमिति। अथेन्द्रियस्य कस्य का वृत्तिरित्युच्यते।

---

शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः
वचनादानविहरणोत्सर्गानन्दाश्चपञ्चानाम् ।२८।

माचशब्दो विशेषार्थः। अविशेषव्यावृत्यर्थो यथा भिक्षा मात्रं लभ्यते नान्यो विशेष इति। तथा चक्षू रूपमात्रे न रसादिषु एवं शेषाण्यपि तद्यथा चक्षुषो रूपं जिह्वाया रसो घ्राणस्य गन्धः श्रोत्रस्य शब्दः त्वचः स्पर्शः। एव मेषां बुद्धीन्द्रियाणां वृत्तिः कथिता कर्म्मेन्द्रियाणां वृत्तिः कथ्यते वचनादानविहरणोत्सर्गानन्दाश्चपञ्चानां कर्म्मेन्द्रियाणामित्यर्थः। वाचो वचनं हस्तयोरादानं पादयोर्विहरणं पायोर्भुक्तस्याहारस्यपरिणतो मलोत्सर्गः उपस्थस्यानन्दः सुतोत्पत्तिर्विषया वृत्तिरिति सम्बन्धः। अधुना बुद्ध्यहंकारमनसामुच्यते।

---

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ।२९।

स्वलक्षणस्वभावा स्वालक्षण्या। अध्यवसायो यो बुद्धिरितिलक्षणमुक्तं सैव बुद्धिवृत्तिः। तथाऽभिमानोऽहंकार इत्यभिमानलक्षणोऽभिमानवृत्तिश्च। संकल्पकं मन इति लक्षणमुक्तं तेन संकल्प एव मनसो वृत्तिः। त्रयस्य बुद्ध्यहंकारमनसां स्वालक्षण्या वृत्तिरसामान्या या प्रागभिहिता बुद्धीन्द्रियाणां च वृत्तिः साऽप्यसामान्यैवेति। इदानीं सामान्या वृत्तिराख्यायते। सा

मान्यकरणवृत्तिः सामान्येन करणानां वृत्तिः प्राणाद्या वायवः पंच प्राणापानसमानोदानव्याना इति पञ्च वायवः सर्व्वेन्द्रियाणां सामान्या वृत्तिर्यतः। प्राणो नाम वायुर्मुखनासिकान्तर्गोचरस्तस्य यत् स्पन्दनं कर्म्म तत् त्रयोदशविधस्याऽपि सामान्या वृत्तिः सति प्राणे यस्मात् करणानामात्मलाभ इति। प्राणोऽपि पञ्जरशकुनि वत् सर्व्वस्य चलनं करोतीति। प्राणनात् प्राण इत्युच्यते। तथाऽपनयनादपानस्तत्र यत्स्पन्दनं तदपि सामान्यवृत्तिन्द्रियस्य। तथा समानो मध्यदेशवर्त्ती य आहारादिनयनात्समं नयनात् समानो वायुस्तत्र यत्स्पन्दनं तत् सामान्यकरणवृत्तिः। तथा ऊर्ध्वारोहणादुत्कर्षादुन्नयनाद्वा उदानो नाभिदेशमस्तकान्तर्गोचरस्तत्रोदाने यत्स्पन्दनं तत् सर्व्वेन्द्रियाणां सामान्या वृत्तिः। किंच शरीरव्याप्तिरभ्यन्तरविभागश्च येन क्रियतेऽसौ शरीरव्यापाकाशवद्व्यानस्तत्र यत् स्पन्दनं तत् करणजालस्य सामान्या वृत्तिरिति। एवमेते पञ्चवायवः सामान्यकरणवृत्तिरिति व्याख्याता त्रयोदशविधस्यापि करणसामान्या वृत्तिरित्यर्थः।

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्द्दिष्टा
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्व्विका वृत्तिः ।३०।

युगपच्चतुष्टयस्य बुद्ध्यहंकारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टयं भवति चतुष्टयस्य दृष्टे प्रतिविषयाध्यवसाये युगपद्वृत्तिर्बुद्ध्यहंकारमनश्चक्षूंषि युगपदेककालं रूपं पश्यति स्थाणुरयमिति। बुद्ध्यहंकारमनोजिह्वा युगपद्रसं गृह्णन्ति। बुद्ध्यहंकारमनोघ्राणानि युगपद्गन्धं गृह्णन्ति। तथा त्वक्श्रोत्रे अपि। किंच क्रमशश्चतस्य निर्द्दिष्टा तस्येति चतुष्टयस्य क्रमशश्च वृत्तिर्भवति। यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा स्थाणुरयं पुरुषो वेति संशये सति तत्रोपरूढां तल्लिङ्गं पश्यति शकुनिं वा ततो तस्य मनसा संकल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति स्थाणुरयमित्यतोऽहंकारश्च निश्चयार्थः स्थाणुरेवेत्येवं

बुद्ध्यहंकारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा यथा रूपे तथा शब्दादिष्वपि बोद्धव्या दृष्टे दृष्टविषये। किंचान्यत्तथाऽप्यदृष्टे त्रयस्य तत्पूर्व्विका वृत्तिरदृष्टेऽनागतेऽतीते च काले बुद्ध्यहंकारमनसां रूपे चक्षुः पूर्व्विका त्रयस्य वृत्तिः स्पर्शे त्वक्पूर्व्विका गन्धे घ्राणपूर्व्विका रसे रसनपूर्व्विका शब्दे श्रवणपूर्व्विका बुद्ध्यहंकारमनसामनागते भविष्यति कालेऽतीते च तत् पूर्व्विका क्रमशो वृत्तिर्वर्त्तमाने युगपत् क्रमशश्चेति । किंच ।

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिं
पुरुषार्थ एव हेतुर्न केनचित् कार्य्यते करणं । ३२ ।

स्वां स्वामिति वीप्सा बुद्ध्यहंकारमनांसि स्वां स्वां वृत्तिं परस्पराकूतहेतुकामाकूतकादरसम्भ्रम इति प्रतिपद्यन्ते पुरुषार्थकरणाय । बुद्धेरहंकारादयो बुद्धिरहंकाराकूतं ज्ञात्वा स्वस्वविषयं प्रतिपद्यते किमर्थमिति चेत् पुरुषार्थ एव हेतुः पुरुषार्थः कर्त्तव्य इत्येवमर्थं गुणानां प्रवृत्तिस्तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति कथं स्वयं प्रवर्त्तन्ते न केनचित् कार्य्यते करणं पुरुषार्थ एवैकः कारयतीति वाक्यार्थो न केनचिदीश्वरेण पुरुषेण कार्य्यते प्रबोध्यते करणं। बुद्ध्यादि कतिविधं तदित्युच्यते ।

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरं
कार्य्यं च तस्य दशधाहार्य्यं धार्य्यं प्रकाश्यं च । ३२ ।

करणं महदादि त्रयोदशविधं बोद्धव्यं पंचबुद्धीन्द्रियाणि चक्षुरादीनि पंच कर्म्मेन्द्रियाणि वागादीनीति त्रयोदशविधं करणं तत्किं करोतीत्येतदाह तदाहरणधारणप्रकाशकरं। तत्राहरणं धारणं च कर्म्मेन्द्रियाणि कुर्व्वन्ति प्रकाशं

बुद्धीन्द्रियाणि । कतिविधं कार्य्यं तस्येति तदुच्यते । कार्य्यं च तस्य दशधा तस्य करणस्य कार्य्यं कर्त्तव्यमिति दशधा दशप्रकारं शब्दस्पर्शरूपरसगन्धाख्यं वचनादानविहरणोत्सर्गानन्दाख्यमेतद्दशविधं कार्य्यं बुद्धीन्द्रियैः प्रकाशितं कर्म्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ।

---

अन्तः करणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यं
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणं । ३३ ।

---

अन्तः करणमिति बुद्ध्यहंकारमनांसि त्रिविधं महदादिभेदात् । दशधा बाह्यं च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि पञ्च दशविधमेतत्करणं बाह्यं तत्रय स्यान्तः करणस्य विषयाख्यं बुद्ध्यहंकारमनसां भोग्यं साम्प्रतकालं श्रोत्रं वर्त्तमानमेव शब्दं शृणोति नातीतं न च भविष्यन्तं चक्षुरपि वर्त्तमानं रूपं पश्यति नातीतं नानागतं त्वग्वर्त्तमानं स्पर्शं जिह्वा वर्त्तमानं रसं नासिका वर्त्तमानं गन्धं नातीतानागतं चेति । एवं कर्म्मेन्द्रियाणि वाग्वर्त्तमानं शब्द मुच्चारयति नातीतम् नानागतं पाणी वर्त्तमानं घटमाददाते नातीतमना गतं च पादौ वर्त्तमानं पन्थानं विहरतो नातीतं नाप्यनागतं पायूपस्थौ च वर्त्तमानावुत्सर्गानन्दौ कुरुतो नातीतौ नानागतौ । एवं बाह्यं करणं साम्प्र तकालमुक्तं त्रिकालमाभ्यन्तरं करणं बुद्ध्यहंकारमनांसि त्रिकालविषयाणि बुद्धिर्वर्त्तमानं घटं बुध्यत अतीतमनागतं चेति । अहंकारो वर्त्तमानेऽभि मानं करोत्यतीतेऽनागते च । तथा मनो वर्त्तमाने संकल्पं कुरुत अतीतेऽ नागते च एवं त्रिकालमाभ्यन्तरं करणमिति । इदानीमिन्द्रियाणि कति सविशेषं विषयं गृह्णन्ति कानि निर्विशेषमिति तदुच्यते ।

---

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि । ३४ ।

बुद्धीन्द्रियाणि तानि सविशेषं विषयं गृह्णन्ति सविशेषविषयं मानुषाणां शब्दस्पर्शरूपरसगन्धान् सुखदुःखमोहविषययुक्तान् बुद्धीन्द्रियाणि प्रकाशयन्ति देवानां निर्विशेषान्विषयान् प्रकाशयन्ति तथा कर्म्मेन्द्रियाणां मध्ये वाग्भवति शब्दविषया देवानां मानुषाणां च वाग्वदति श्लोकादीनुच्चारयति तस्माद्देवानां मानुषाणां च वागिन्द्रियं तुल्यं शेषाण्यपि वाग्व्यतिरिक्तानि पाणिपादपायूपस्थसञ्ज्ञितानि पञ्चविषयाणि पञ्चविषयाः शब्दादयो येषां तानि पञ्चविषयाणि शब्दस्पर्शरूपरसगन्धाः पाणौ सन्ति पञ्चशब्दादिलक्षणायां भुवि पादो विहरति पाय्विन्द्रियं पंचकृष्णमुत्सर्गं करोति तथोपस्थेन्द्रियं पञ्चलक्षणं शुक्रमानन्दयति ।

सान्तःकरणा बुद्धि सर्व्वं विषयमवगाहते यस्मात्
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि । ३५ ।

सान्तःकरणा बुद्धिरहंकारमनः सहितेत्यर्थः यस्मात् सर्व्वं विषयमवगाहते गृह्णाति त्रिष्वपि कालेषु शब्दादीन् गृह्णाति तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि शेषाणि करणानीति वाक्यशेषः । किंचान्यत् ।

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति । ३६ ।

यानि करणान्युक्तानि एते गुणविशेषाः किं विशिष्टाः प्रदीपकल्पाः प्रदीप

वद्विषयप्रकाशकाः परस्परविलक्षणा असदृशा भिन्नविषया इत्यर्थः। गुण विषया इत्यर्थः। गुणविशेषा गुणेभ्यो जाताः। कृत्स्नं पुरुषस्यार्थं बुद्धीन्द्रियाणि कर्म्मेन्द्रियाण्यहंकारो मनश्चैतानि स्वं स्वमर्थं पुरुषस्य प्रकाश्य बुद्धौ प्रयच्छन्ति बुद्धिस्थं कुर्वन्तीत्यर्थः। यतो बुद्धिस्थं सर्व्वं विषयं सुखादिकं पुरुष उपलभ्यते। इदंचान्यत्।

सर्व्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मं ।३७।

सर्व्वेन्द्रियगतं त्रिष्वपि कालेषु सर्व्वं प्रत्युपभोगमुपभोगं प्रति देवमनुष्य तिर्य्यग् बुद्धीन्द्रियकर्म्मेन्द्रियद्वारेण सान्तः करणा बुद्धिः साधयति सम्पादयति यस्मात् तस्मात् सैव च विशिनष्टि प्रधानपुरुषयोर्विषयविभागं करोति प्रधानपुरुषान्तरं नानात्वमित्यर्थः। सूक्ष्ममित्यनधिकृततपश्चरणैरप्राप्य इयं प्रकृतिः सत्वरजस्तमसां साम्यावस्था इयं बुद्धिरयमहंकार एतानि पंच तन्मात्राण्येकादशेन्द्रियाणि पंचमहाभूतान्ययमन्यः पुरुष एभ्यो व्यतिरिक्त इत्येव वोधयति बुद्धिर्यस्यावापादपवर्गो भवति। पूर्व्वमुक्तं विशेषाविशेषविषयाणि तत् के विषयास्तच्चदर्शयति।

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ।३८।

यानि पंच तन्मात्राण्यहंकारादुत्पद्यन्ते ते शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमेतान्यविशेषा उच्यन्ते देवानामेते सुखलक्षणा विषया दुःखमोहरहितास्तेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्चमहाभूतानि पृथिव्यप्तेजोवाय्वाकाशसञ्ज्ञानि यान्युत्पद्यन्ते। एते स्मृता विशेषाः। गन्धतन्मा

त्रात् पृथिवी रसतन्मात्रादापो रूपतन्मात्रात्तेजः स्पर्शतन्मात्राद्वायुः शब्द तन्मात्रादाकाशमित्येवमुत्पन्नान्येतानि महाभूतान्येते विशेषा मानुषाणां विषयाः शान्ताः सुखलक्षणा घोरा दुःखलक्षणा मूढा मोहजनका यथाकाशं कस्यचिदनवकाशादन्तर्गृहादेर्निर्गतस्य सुखात्मकं शान्तं भवति तदेव शीतोष्णवातवर्षाभिभूतस्य दुःखात्मकं घोरं भवति तदेव पन्थानं गच्छतो वन मार्गाद् भ्रष्टस्य दिङ् मोहान्मूढं भवति।एवं वायुर्घर्म्मार्त्तस्य शान्तो भवति शीतार्त्तस्य घोरो धूलीशर्क्कराविमिश्रोऽतिवान् मूढ इति । एवं तेजः प्रभृतिषु द्रष्टव्यं । अथाऽन्ये विशेषाः ।

---

सूक्ष्मा मातापितृजाः सहप्रभूतैस्त्रिधा विशेषाः स्युः
सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते ।३९।

---

सूक्ष्मास्तन्मात्राणि यत्संगृहीतं तन्मात्रिकं सूक्ष्मशरीरं महदादिलिङ्गं सदा तिष्ठति संसरतिच ते सूक्ष्मास्तथामातापितृजा स्थूलशरीरोपचायका ऋतु काले मातापितृसंयोगे शोणितशुक्रमिश्रीभावेनोदरान्तः सूक्ष्मशरीरस्योपचयं कुर्वीत तत् सूक्ष्मशरीरं पुनर्मातुरशितपीतनानाविधरसेन नाभीनिबन्धेनाप्यायते तथाप्यारब्धं शरीरं सूक्ष्मैर्मातापितृजैश्च सहमहाभूतैस्त्रिधाविशेषैः पृष्ठोदरजंघाकट्युरः शिरः प्रभृति षाट् कौशिकं पञ्चभौतिकं रुधिरमांस स्नायुशुक्रास्थिमज्जसंभृतमाकाशोऽवकाशदानाद्वायुर्वर्द्धनात् तेजः पाकादापः संग्रहात्पृथिवी धारणात् समस्तावयवोपेतं मातुरुदराद्बहिर्भवति । एवमेते त्रिविधा विशेषा स्युः । अत्राह के नित्याः के वाऽनित्याः सूक्ष्मास्तेषांनियताः सूक्ष्मास्तन्मात्रसञ्ज्ञकास्तेषांमध्ये नियता नित्यास्तैरारब्धं शरीरं कर्म्मवशात् पशुमृगपक्षिसरीसृपस्थावरजातिषु संसरति धर्म्मवशादिन्द्रकादिलोकेष्वेवमेत न्नियतं सूक्ष्मशरीरं सरति यावत् ज्ञानमुत्पद्यते उत्पन्ने ज्ञाने विद्वांच्छरीरं त्यक्त्वा मोक्षं गच्छति तस्मादेते विशेषा सूक्ष्मा नित्या इति मातापितृजा

निवर्त्तन्ते तत् सूक्ष्मशरीरं परित्यज्येहैव प्राणत्यागवेलायां मातापितृजा नि वर्त्तन्ते मरणकाले मातापितृजं शरीरमिहैवनिवर्त्त्य भूम्यादिषु प्रलीयते यथा तत्वं सूक्ष्मं च कथं संसरति तदाह ।

---

पूर्व्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्य्यन्तं
संसरति निरुपभोगं भावैरधिवासितं लिंगं । ४० ।

---

यदा लोकाऽनुत्पन्नाः प्रधानादिसर्गे तदा सूक्ष्मशरीरमुत्पन्नमिति । किंचान्य दसक्तं न संयुक्तं तिर्य्यग्योनिदेवमानुषस्थानेषु सूक्ष्मत्वात् कुत्रचिदसक्तं पर्व्वता दिष्वप्रतिहतप्रसरं सरति गच्छति । नित्यं यावन्नज्ञानमुत्पद्यते तावत् संसरति तच्च महदादिसूक्ष्मपर्य्यन्तं महानादौ यस्य तन्महदादि बुद्धिरहंकारो मन इति पञ्च तन्मात्राणि सूक्ष्मपर्य्यन्तं तन्मात्रपर्य्यन्तं संसरति घूलग्रहपिपीलि का वत् त्रीनपि लोकान् । निरुपभोगं भोगरहितं तत् सूक्ष्मशरीरं पितृमा तृजेन बाह्येनोपचयेन क्रियाधर्म्मग्रहणाद् भोगेषु समर्थं भवतीत्यर्थः । भावै रधिवासितं पुरस्ताद्भावान् धर्म्मादीन् वक्ष्यामस्तैरधिवासितमुपरञ्जितं लिं गमिति । प्रलयकाले महदासूक्ष्मपर्य्यन्तं करणोपेतं प्रधाने लीयत असंस रयुक्तं सदासर्गकालमत्रवर्त्तते प्रकृतिमोहबन्धनबद्धं सत् संसरणादिक्रियास्वस मर्थमिति पुनः सर्गकाले संसरति तस्माल्लिंगं सूक्ष्मं । किं प्रयोजनेन त्रयो दशविधं करणं संसरतीत्येवं चोदिते सत्याह ।

---

चित्रं यथाश्रयमृते स्थाणवादिभ्यो यथा विना छाया
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिंगं । ४१ ।

---

चित्रं यथा कुड्याश्रयमृते न तिष्ठति स्थाणवादिभ्यः कीलकादिभ्यो विना

छाया न तिष्ठति तैर्विना न भवत्यादिग्रहणाद्यथा शैत्यं विना नापो भवन्ति शैत्यं वाऽद्भिर्विना । अग्निरुष्णं विना वायुः स्पर्शंविना आकाशमवकाशं विना पृथिवी गन्धं विना तद्वदेतेन दृष्टान्तेन न्यायेन विना विशेषैरविशेषै स्तन्मात्रैर्विना न तिष्ठति । अथ विशेषभूतान्युच्यन्ते शरीरं पंचभूतमयं वैशेषिणा शरीरेण विना क्व लिङ्गस्थानं चेति क एकदेहमुज्झति तदेवान्य माश्रयति निराश्रयमाश्रयरहितं लिङ्गं त्रयोदश विधं करणमित्यर्थः । कि मर्थं तदुच्यते ।

---

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं । ४२ ।

---

पुरुषार्थः कर्त्तव्य इति प्रधानं प्रवर्त्तते स च द्विविधः शब्दाद्युपलब्धिलक्षणो गुणपुरुषान्तरोपलब्धिर्मोक्ष इति तस्मादुक्तं पुरुषार्थहेतुकमिदं सूक्ष्मशरीरं प्रवर्त्तत इति । निमित्तनैमित्तिकप्रसंगेन निमित्तं धर्म्मादि नैमित्तिकमूर्द्ध्वग मनादि पुरस्तादेव वक्ष्यामः प्रसंगेन प्रसक्त्या प्रकृतेः प्रधानस्य विभुत्वयो गाद्यथा राजा स्वराष्ट्रे विभुत्वाद्यद्यदिच्छति तत्तत् करोतीति तथा प्रकृतेः सर्व्वत्रविभुत्वयोगान्निमित्तनैमित्तिकप्रसंगेन व्यवतिष्ठते पृथक् पृथग्देहधारणे लिङ्गस्य व्यवस्थां करोति । लिंगं सूक्ष्मः परमाणुभिस्तन्मात्रैरुपचितं शरीरं त्रयोदशविधकरणोपेतं मानुषदेवतिर्य्यग्योनिषु व्यवतिष्ठते कथं नटवत् यथा नटः पटान्तरेण प्रविश्य देवो भूत्वा निर्गच्छति पुनर्मानुषः पुनर्विदुषकः । एवं लिंगं निमित्तनैमित्तिकप्रसंगेनोदरान्तः प्रविश्य हस्ती स्त्री पुमान् भव ति । भावैरधिवासितं लिंगं संसरतीत्युक्तं तत् के भावा इत्याह ।

---

सांसिद्धिकाश्चभावाः प्राकृतिका वैकृतिकाश्चधर्म्माद्याः
दृष्टाः करणाश्रयिणः कार्य्याश्रयिणश्च कललाद्याः ।४३।

भावास्त्रिविधाश्चिंत्यन्ते सांसिद्धिकाः प्राकृता वैकृताश्च । तत्र सांसिद्धिका यथा भगवतः कपिलस्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्ना धर्म्मो ज्ञानं वैराग्यमैश्वर्य्यमिति । प्राकृताः कथ्यन्ते ब्रह्मणश्चत्वारः पुत्राः सनकसनंदनसनातनसनत्कुमारा बभूवुः तेषामुत्पन्नकार्य्यकारणानां शरीरिणां षोडशवर्षाणामेते भावाश्चत्वारसमुत्पन्नास्तस्मादेते प्राकृताः । तथा वैकृता यथा आचार्य्यमूर्त्तिनिमित्तं कृत्वाऽस्मदादीनां ज्ञानमुत्पद्यते ज्ञानाद्वैराग्यं वैराग्याद्धर्म्मो धर्म्मादैश्वर्य्यमिति । आचार्य्यमूर्त्तिरपि विकृतिरिति तस्माद्वैकृता एते भावा उच्यन्ते यैरधिवासितं लिंगं संसरत्येते चत्वारो भावाः सात्विकास्तामसाविपरीताः सात्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तमित्यत्र व्याख्याता एवमष्टौ धर्म्मो ज्ञानं वैराग्यमैश्वर्य्यमधर्म्मोऽज्ञानमवैराग्यमनैश्वर्य्यमित्यष्टौ भावाः । क्व वर्त्तन्ते दृष्टाः करणाश्रयिणो बुद्धिः करणं तदाश्रयिणः । एतदुक्तमध्यवसायो बुद्धिः धर्म्मो ज्ञानमिति कार्य्यं देहस्तदाश्रयाः कललाद्या ये मातृजा इत्युक्ताः शुक्रशोणितसंयोगे विवृद्धिहेतुकाः कललाद्या बुद्बुदमांसपेशीप्रभृतयः तथा कौमारयौवनस्थविरत्वादयो भावा अन्नपानरसनिमित्ता निष्पद्यन्त अतः कार्य्याश्रयिण उच्यन्त अन्नादिविषयभोगनिमित्ता जायन्ते। निमित्तनैमित्तिकप्रसंगेनेति यदुक्तमत्रोच्यते।

धर्म्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्म्मेण
ज्ञानेन चापवर्गो विपर्य्ययादिष्यते बन्धः ।४४।

धर्म्मेण गमनमूर्द्ध्वं धर्म्मं निमित्तं कृत्वोर्द्ध्वमुपनयति ऊर्द्ध्वमित्यष्टौ स्थानानि

गृह्यन्ते तद्यथा । ब्राह्मं प्राजापत्यं सौम्यमैन्द्रं गान्धर्व्वं याक्षं राक्षसं पैशाच मिति तत् सूक्ष्मं शरीरं गच्छति पशुमृगपक्षिसरीसृपस्थावरान्तेषुधर्म्मो निमित्तं । किंच ज्ञानेनचापवर्गश्च पञ्चविंशति तत्वज्ञानं तेन निमित्तेनापवर्गो मोक्षः ततः सूक्ष्मं शरीरं निवर्त्तते परमात्मा उच्यते । विपर्य्ययादिष्यते बन्ध अज्ञानं निमित्तं सचैष नैमित्तिकः प्राकृतो वैकारिको दाक्षिणिकश्च बन्ध इति वक्ष्यति पुरस्ताद्यदिदमुक्तं प्राकृतेन च बन्धेन तथा वैकारिकेण च । दक्षिणाभिस्तृतीयेन बद्धो नान्येन मुच्यते । तथाऽन्यदपि निमित्तं ।

---

वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्
ऐश्वर्य्यादविघातो विपर्य्ययात् तद्विपर्य्यासः । ४५ ।

---

यथा कस्यचिद्वैराग्यमस्ति न तत्वज्ञानं तस्मादज्ञानपूर्वाद्वैराग्यात् प्रकृतिलयो मृतोऽष्टासु प्रकृतिषु प्रधानबुद्ध्यहंकारतन्मात्रेषु लीयते न मोक्षः ततो भूयोऽपि संसरति तथा योऽयं राजसो रागः यजामि दक्षिणां ददामि येनामुष्मिल्लोकेऽच यद्दिव्यं मानुषं सुखमनुभवाम्येतस्माद्राजसाद्रागात् संसारो भवति । तथा ऐश्वर्य्यादविघात एतदैश्वर्य्यमष्टगुणमणिमादियुक्तं तस्मादैश्वर्य्यनिमित्तादविघातो नैमित्तिको भवति ब्रह्मादिषु स्थानेष्वैश्वर्य्यं न विहन्यते । किंचान्यद्विपर्य्ययाद्विपर्य्यासः तस्याविघातस्यविपर्य्यासो विघातो भवत्यनैश्वर्य्यात् सर्व्वत्र विहन्यते । एष निमित्तैः सह नैमित्तिकः षोडशविधो व्याख्यातः स किमात्मक इत्याह ।

---

एष प्रत्ययसर्गो विपर्य्ययाशक्तितुष्टिसिद्ध्याख्यः
गुण वैषम्यविमर्द्दात् तस्य च भेदास्तु पंचाशत् ।४६।

यथा एष शोडशविधो निमित्तनैमित्तभेदो व्याख्यात एष प्रत्ययसर्ग उच्यते। प्रत्ययो बुद्धिरित्युक्ताऽध्यवसायो बुद्धिर्धर्म्मो ज्ञानमित्यादि स च प्रत्यय सर्गश्चतुर्धा भिद्यते विपर्य्ययाशक्तितुष्टिसिद्ध्याख्यभेदात् । तत्र संशयोऽ ज्ञानं। यथा कस्यचित् स्थाणुदर्शने स्थाणुरयं पुरुषो वेति संशयः। अश क्तिर्यथा। तमेवस्थाणुं सम्यग्दृष्ट्वा संशयं छेत्तुं न शक्नोतीत्यशक्तिः। एवं तृतीयस्तुष्ट्याख्यो यथा। तमेवस्थाणुं ज्ञातुं संशयितुं वा नेच्छति किमनेना स्माकमित्येषा तुष्टिः। चतुर्थः सिद्ध्याख्यो यथा। आनन्दितेन्द्रियः स्थाणु मारूढां वल्लिं पश्यति शकुनिं वा तस्य सिद्धिर्भवति स्थाणुरयमिति। एव मस्य चतुर्विधस्य प्रत्ययसर्गस्य गुणवैषम्यविमर्द्दे तस्यभेदास्तु पञ्चाशत् योऽयं सत्वरजस्तमोगुणानां वैषम्यो विमर्द्दः तेन तस्य प्रत्ययसर्गस्य पञ्चाशद्भेदा भवन्ति तथा क्वापि सत्वमुत्कटं भवति रजस्तमसी उदासीने क्वापि रजः क्वापि तम इति भेदाः कथ्यन्ते।

---

पंच विपर्य्ययभेदा भवन्त्यशक्तिश्चकरणवैकल्यात्
अष्टाविंशतिभेदास्तुष्टिर्नवधाऽष्टधा सिद्धिः ।४७।

पंच विपर्य्ययभेदास्तेयथा तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इत्ये षां भेदानां नानात्वं वक्ष्यतेऽनन्तरमेवेति। अशक्तेस्त्वष्टाविंशति भेदा भवन्ति करणवैकल्यात् तानपि वक्ष्यामस्तथा च तुष्टिर्नवधा ऊर्द्धस्रोतसि राजसानि ज्ञानानि। तथाष्टविधा सिद्धिः सात्विकानि ज्ञानानि तत्रैवोर्द्धस्रोतसि। एतत् क्रमेणैव वक्ष्यन्ते तत्रविपर्य्ययभेदा उच्यन्ते।

---

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः
तामिस्रोऽष्टदशधा तथा भवत्यन्धतामिस्रः । ४८ ।

तमसस्तावदष्टधा भेदः प्रलयोऽज्ञानाद्विभज्यते सोऽष्टासु प्रकृतिषु लीयते प्रधानबुद्ध्यहंकारपंचतन्मात्राष्टासु तत्र लीनमात्मानं मन्यते मुक्तोहमिति तमो भेद एषोऽष्टविधस्य मोहस्य भेदोऽष्टविध एवेत्यर्थः । यत्राष्टगुणमणि माद्यैश्वर्य्यं तत्र संगादिन्द्रादयो देवा न मोक्षं प्राप्नुवन्ति पुनश्चतत् क्षये संस रंत्येषोऽष्टविधो मोह इति । दशविधो महामोहः शब्दस्पर्शरूपरसगन्धा देवानामेते पंचविषयाः सुखलक्षणाः मानुषाणामप्येते एव शब्दादयः पञ्च विषया एवमेतेषु दशसु महामोह इति । तामिस्रोऽष्टदशधाऽष्टविधमैश्वर्य्यं दृष्टानुश्रविका विषया दश एतेषामष्टादशानां सम्पदमनुनन्दन्ति विपदं ना नुमोदन्त्येषोऽष्टादशविधो विकल्पस्तामिस्रो । यथा तामिस्रमष्टगुणमैश्वर्य्यं दृष्टानुश्रविका दशविषयास्तथान्धतामिस्रोऽप्यष्टादशभेद एवं किंतु विषयस म्पत्तौ सम्भोगकाले य एव म्रियतेऽष्टगुणैश्वर्य्याद्वा भ्रस्यते ततस्तस्य महद्दुः खमुत्पद्यते सोऽन्धतामिस्र इति । एवं विपर्य्ययभेदास्तमः प्रभृतयः पंच प्रत्येकं भिद्यमाना द्विषष्टिभेदाः संवृत्ता इति । अशक्तिभेदाः कथ्यन्ते ।

---

एकादशेन्द्रियबधा सह बुद्धिबधैरशक्तिरुद्दिष्टा
सप्तदशबधा बुद्धेर्विपर्य्ययात् तुष्टिसिद्धीनाम् । ४९ ।

भवंत्यशक्तेश्च करणवैकल्यादष्टाविंशतिभेदा इत्युद्दिष्टं तत्रैकादशेन्द्रियबधाः बाधिर्य्यमन्धताप्रसुप्तिरुपजिह्विकाघ्राणपाको मूकता कुणित्वं खाञ्ज्यं गुदा वर्त्तः क्लैब्यमुन्माद इति । सह बुद्धिबधैरशक्तिरुद्दिष्टा ये बुद्धिबधास्तैः सहाश क्तेरष्टाविंशतिभेदा भवन्ति सप्तदशबधा बुद्धेः सप्तदशबधास्ते तुष्टिभेदसिद्धि भेदवैपरीत्येन तुष्टिभेदा नव सिद्धिभेदा अष्टौ ये ते विपरीतैः सह एकादश

विधा एवमष्टाविंशतिविकल्पा अशक्तिरिति विपर्य्ययात् सिद्धितुष्टीनामेव भेदक्रमो द्रष्टव्यः । तत्र तुष्टिर्नवधा कथ्यते ।

---

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः
बाह्या विषयोपरमात् पंच नव तुष्टयोऽभिमताः ।५०।

---

आध्यात्मिकाश्चतस्र तुष्टयोऽध्यात्मनि भवा आध्यात्मिका ताश्च प्रकृत्युपादानकालभाग्याख्याः । तत्र प्रकृत्याख्या यथा कश्चित् प्रकृतिं वेत्ति तस्याः सगुणनिर्गुणत्वं च तेन तत्वं तत् कार्य्यं विज्ञायैव केवलं तुष्टस्तस्य नास्ति मोक्ष एषा प्रकृत्याख्या। उपादानाख्या यथा कश्चिदविज्ञायैव तत्वान्युपादान ग्रहणं करोति त्रिदण्डकमण्डलुविविदिकाभ्यो मोक्ष इति तस्यापि नास्त्येषा उपादानाख्या । तथा कालाख्या कालेन मोक्षो भविष्यतीति किं तत्वाभ्यासेनेत्येष कालाख्या तुष्टिस्तस्य नास्ति मोक्ष इति । तथा भाग्याख्या भाग्येनैव मोक्षो भविष्यतीति भाग्याख्या । चतुर्द्धा तुष्टिरिति । बाह्याविषयोपरमाच्च पंच । बाह्यास्तुष्टयः पञ्च विषयोपरमात् शब्दस्पर्शरूपरसगन्धेभ्य उपरतोऽर्जनरक्षणक्षयसंगहिंसादर्शनात्। वृद्धिनिमित्तं पाशुपाल्यवाणिज्यप्रतिग्रहसेवाः कार्य्या एतदर्जनं दुःखमर्जितानां रक्षणे दुःखमुपभोगात् क्षीयत इति क्षयदुःखं । तथा विषयोपभोगसंगे कृते नास्तीन्द्रियाणामुपशम इति संगदोषः। तथा न अनुपहत्य भूतान्युपभोग इत्येषहिंसादोषः। एवमर्ज्जनादिदोषदर्शनात् पंचविषयोपरमात् पंच तुष्टयः । एवमाध्यात्मिकबाह्यभेदान्नव तुष्टयस्तासां नामानि शास्त्रान्तरे प्रोक्तानि। अम्भः सलिल मोघो वृष्टिः सुतमो पारं सुनेत्रं नारीकमनुत्तमांभसिकमिति। आसां तुष्टीनां विपरीताशक्तिभेदाद्बुद्धिबधा भवन्ति। तद्यथा अनम्भोऽसलिलमनोघ इत्यादिवैपरीत्याद्बुद्धिबधा इति । सिद्धिरुच्यते ।

---

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः । ५१ ।

ऊहो यथा कश्चिन्नित्यमूहते किमिहसत्यं किं परं किं नैश्रेयसं किं कृतार्थः स्यामिति चिंतयतो ज्ञानमुत्पद्यते प्रधानादन्य एव पुरुष इत्यन्या बुद्धिरन्यो ऽहंकारोऽन्यानि तन्मात्राणीन्द्रियाणिपंचमहाभूतानीत्येवं तत्वज्ञानमुत्पद्यते येन मोक्षो भवति एषा ऊहाख्या प्रथमा सिद्धिः । तथा शब्दज्ञानात् प्रधानपुरुषबुद्ध्यहंकारतन्मात्रेन्द्रियपञ्चमहाभूतविषयं ज्ञानं भवति ततो मोक्ष इत्येषा शब्दाख्या सिद्धिः । अध्ययनाद्वेदादिशास्त्राध्ययनात् पंचविंशतितत्व ज्ञानं प्राप्य इत्येषा तृतीया सिद्धिः । दुःखविघातत्रयमाध्यात्मिक आधिभौतिक आधिदैविक दुःखत्रयविघाताय गुरुं समुपगम्य तत उपदेशान्मोक्षं यात्येषा चतुर्थी सिद्धिः । एषैवदुःखत्रयभेदात् त्रिधा कल्पनीया इति षट् सिद्धयः । तथासुहृत्प्राप्तिर्यथा कश्चित् सुहृत् ज्ञानमधिगम्य मोक्षं गच्छति एषा सप्तमी सिद्धिः । दानं यथा कश्चिद्भगवतां प्रत्याश्रयौषधित्रिदण्डकुण्डिकादीनां ग्रासाछादनादीनां च दानेनोपकृत्य तेभ्यो ज्ञानमवाप्य मोक्षंयात्येषाष्टमी सिद्धिः । आसामष्टानां सिद्धीनां शास्त्रान्तरे संज्ञाःकृतास्तारं सुतारं तारतारं प्रमोदं प्रमुदितं प्रमोदमानं रम्यकं सदाप्रमुदितमिति । आसां विपर्य्ययाबुद्धेर्बधा ये विपरीतास्त अशक्तौ निक्षिप्ता यथाऽतारमसुतारम तारतारमित्यादिद्रष्टव्यमशक्तिभेदा अष्टाविंशतिरुक्तास्ते सहबुद्धिबधैरेकादशेन्द्रियबधा इति । तत्र तुष्टिविपर्य्यया नव सिद्धीनां विपर्य्यया अष्टौ एव मेते सप्तदशबुद्धिबधा एतैः सहेन्द्रियबधा अष्टाविंशतिरशक्तिभेदाः पश्चात् कथिता इति विपर्य्ययाशक्तितुष्टिसिद्धीनामेवोद्देशो निर्देशश्चकृत इति । किं चान्यत् सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः सिद्धेः पूर्वा या विपर्य्ययाशक्तितुष्टयस्ता एव सिद्धेरंकुशस्तद्भेदादेवं त्रिविधो यथा हस्ती गृहीतांकुशेन वशो भवत्येव विपर्य्ययाशक्तितुष्टिभिर्गृहीतो लोकोऽज्ञानंमाप्नोति तस्मादेताः परित्यज्य

सिद्धिः सेव्या स सिद्धेस्तत्वज्ञानमुत्पद्यते तन्मोक्ष इति। अथ यदुक्तं भावैरधि वासितं लिंगं तत्र भावा धर्म्मादयोऽष्टावुक्ता बुद्धिपरिणामा विपर्य्ययाशक्तितुष्टिसिद्धिपरिणताः स भावाख्यः प्रत्ययसर्गः लिंगंच तन्मात्रसर्गश्चतुर्दशभूतपर्य्यन्त उक्तस्तत्रैकेनैवसर्गेण पुरुषार्थसिद्धौ किमुभयविधसर्गेणेत्यत आह।

---

न विना भावैर्लिंगं न निवा लिंगेन भावनिर्वृत्तिः
लिंगाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्त्तते सर्गः ।५२।

---

भावैः प्रत्ययसर्गैर्विना लिंगं न तन्मात्रसर्गो न पूर्व्वपूर्व्वसंस्काराद्दष्टकारितत्वादुत्तरोत्तरदेहलम्भस्य लिंगेन तन्मात्रसर्गेण च विना भावनिर्वृत्तिर्न स्थूलसूक्ष्मदेहसाध्यत्वाद्धर्म्मादेरनादित्वाच्च सर्गस्य वीजांकुरावन्योन्याश्रयो न दोषाय तत्तज्जातीयापेक्षित्वेऽपि तत्तद्व्यक्तीनां परस्परानपेक्षित्वात्तस्माद्भावाख्यो लिंगाख्यश्चद्विविधः प्रवर्त्तते सर्ग इति किंचान्यत्।

---

अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पंचधा भवति
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ।५३।

---

तत्र दैवमष्टप्रकारं ब्राह्मं प्राजापत्यं सौम्यमैन्द्रं गान्धर्व्वं याक्षं राक्षसं पैशाचमिति। पशुमृगपक्षिसरीसृपस्थावराणि भूतान्येव पञ्चविधस्तैरश्चः। मानुषयोनिरेकैव इति चतुर्द्दशभूतानि त्रिष्वपि लोकेषु गुणत्रयमस्ति तत्र कस्मिन् किमधिकमुच्यते।

---

ऊर्द्ध्वं सत्वविशालस्तमोविशालश्च मूलतःसर्गः
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तं । ५४ ।

ऊर्द्ध्वमित्यष्टसु देवस्थानेषु सत्वविशालः सत्वविस्तारः सत्वोत्कट ऊर्द्ध्वसत्व इति । तत्रापि रजस्तमसी स्तः । तमोविशालो मूलतः पश्वादिषुस्थाव रान्तेषु सर्वःसर्गस्तमसाधिक्येन व्याप्तस्तत्रापि सत्वरजसी स्तः । मध्ये मा नुषे रज उत्कटं तत्रापि सत्वतमसी विद्येते तस्माद्दुःखप्राया मनुष्याः । एवं ब्रह्मादिस्तम्बपर्य्यन्तः ब्रह्मादिस्थावरान्त इत्यर्थः । एवमभौतिकः सर्गो लिंगसर्गो भावसर्गो भूतसर्गो दैवमानुषतैर्य्यग्योनय इत्येषः प्रधानकृतः षोडशसर्गः ।

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः
लिंगस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन । ५५ ।

तत्रेति तेषु देवमानुषतिर्य्यग्योनिषु जराकृतं मरणकृतं चैव दुःखं चेतनः चैतन्यवान् पुरुषः प्राप्नोति न प्रधानं न बुद्धिर्नाहंकारो न तन्मात्राणीन्द्रि याणिमहाभूतानि च । कियन्तकालं पुरुषो दुःखं प्राप्नोतीति तद्विविनक्ति । लिंगस्याविनिवृत्तेर्यत्तन्महदादि लिंगशरीरेणाविश्य तत्र व्यक्तीभवति तद्या वन्निवर्त्तते संसारशरीरमिति संक्षेपेण त्रिषु स्थानेषु पुरुषो जरामरणकृतं दुःखं प्राप्नोति लिंगस्याविनिवृत्तेः लिंगस्य विनिवृत्तिं यावत् । लिंगनि वृत्तौ मोक्षो मोक्षप्राप्तौ नास्तिदुःखमिति । तत्पुनः केन निवर्त्तते यदा पंच विंशतितत्वज्ञानं स्यात् सत्वपुरुषान्यथाख्यातिलक्षणमिदं प्रधानमियं बुद्धि रयमहंकार इमानि पंचतन्मात्राण्येकादशेन्द्रियाणि पंच महाभूतानि ये भ्योन्यः पुरुषो विसदृश इत्येवं ज्ञानाल्लिंगनिवृत्तिस्ततो मोक्ष इति । प्रवृत्तेः किं निमित्तमारभ्भ इत्युच्यते ।

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्य्यन्तः
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ।५६।

इत्येष परिसमाप्तौ निर्द्देशे च प्रकृतिकृतौ प्रकृतिकरणे प्रकृतिक्रियायां य आरम्भो महदादिविशेषभूतपर्य्यन्तः प्रकृतेर्महान् महतोऽहंकारस्तस्मात्तन्मात्राण्येकादशेन्द्रियाणि तन्मात्रेभ्यः पंचमहाभूतानीत्येषः प्रतिपुरुषविमोक्षार्थं पुरुषं प्रति देवमनुष्यतिर्य्यग्भावं गतानां विमोक्षार्थमारम्भः कथं स्वार्थ इव परार्थमारम्भः यथा कश्चित् स्वार्थं त्यक्त्वा मित्रकार्य्याणि करोति एवं प्रधानं। पुरुषोऽत्रप्रधानस्य न किञ्चित् प्रत्युपकारं करोति। स्वार्थ इव न च स्वार्थः परार्थ एवार्थः शब्दादिविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च त्रिषु लोकेषु शब्दादिविषयैः पुरुषा योजयितव्या अन्तेच मोक्षेणेति प्रधानस्य प्रवृत्तिस्तथा चोक्तं। कुम्भवत् प्रधानं पुरुषार्थं कृत्वा निवर्त्तत इति। अत्रोच्यतेऽचेतनं प्रधानं चेतनः पुरुष इति मया त्रिषु लोकेषु शब्दादिभिर्विषयैः पुरुषो योज्योऽन्ते मोक्षः कर्त्तव्य इति कथं चेतनवत् प्रवृत्तिः। सत्यं किंत्वचेतनानामपि प्रवृत्तिर्दृष्टा निवृत्तिश्चयस्मादित्याह।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।५७।

यथा तृणोदकं गवा भक्षितं क्षीरभावेन परिणम्य वत्सविवृद्धिं करोति पुष्टे च वत्से निवर्त्तत एव पुरुषविमोक्षनिमित्तं प्रधानं। अज्ञस्यप्रवृत्तिरिति। किंच।

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं ।५८।

यथा लोक इष्टौत्सुक्ये सति तस्य निवृत्त्यर्थं क्रियासु प्रवर्त्तते गमनागमन क्रियासु कृतकार्य्यो निवर्त्तते तथा पुरुषस्य विमोक्षार्थं शब्दादिविषयोपभोगोपलब्धिलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं च द्विविधमपि पुरुषार्थं कृत्वा प्रधानं निवर्त्तते । किंचान्यत् ।

---

रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात्
पुरुषस्य तथात्मानं प्रकाश्य निवर्त्तते प्रकृतिः ।५९।

यथा नर्त्तकी शृङ्गारादिरसैरितिहासादिभावैश्च निबद्धगीतवादित्रवृत्तानि रङ्गस्य दर्शयित्वा कृतकार्य्या नृत्यान्निवर्त्तते तथा प्रकृतेरपि पुरुषस्यात्मानं प्रकाश्य बुद्ध्यहंकारतन्मात्रेन्द्रियमहाभूतभेदेन निवर्त्तते। कथं को वा स्यान्निवर्त्तको हेतुस्तदाह ।

---

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ।६०।

नानाविधैरुपायैः प्रकृतिः पुरुषस्योपकारिण्यनुपकारिणः पुंसः कथं देवमानुषतिर्य्यग्भावेन सुखदुःखमोहात्मकभावेन शब्दादिविषयभावेन एवं नानाविधैरुपायैरात्मानं प्रकाश्याहमन्या त्वमन्य इति निवर्त्तत अतो नित्यस्य तस्यार्थमपार्थं कुरुते चरति च यथा कश्चित् परोपकारी सर्व्वस्योपकुरुते नात्मनः प्रत्युपकारमीहत एव प्रकृतिः पुरुषार्थं चरति करोत्यपार्थकं। पश्चादुक्तमात्मानं प्रकाश्य निवर्त्तते निवृत्ता च किं करोतीत्याह ।

---

प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ।६१।

लोके प्रकृतेः सुकुमारतरं न किञ्चिदस्तीत्येवं मे मतिर्भवति येन परार्थ एवं मतिरुत्पन्ना कस्मादहमनेन पुरुषेण दृष्टास्मीत्यस्य पुंसो पुनर्दर्शनं नो पैति पुरुषस्यादर्शनमुपयातीत्यर्थः। तत्र सुकुमारतरं वर्णयति। ईश्वरं कारणं ब्रुवते। अजो जन्तुरनीशोयमात्मा नः सुखदुःखयोरीश्वरप्रेरितोगच्छेत् स्वर्गं नरकमेव वा। अपरे स्वभावकारणिकां ब्रुवते। केन शुक्लीकृता हंसा मयूराः केन चित्रिताः। स्वभावेनैवेति। अत्रसांख्याचार्य्या आहुः निर्गुणत्वादीश्वरस्य कथं सगुणतः प्रजा जायेरन् कथं वा पुरुषान्निर्गुणादेव तस्मात् प्रकृतेर्युज्यते तथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति कृष्णेभ्यः कृष्ण एवेति। एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते। निर्गुण ईश्वरः सगुणानां लोकानां तस्मादुत्पत्तिरयुक्तेति। अनेन पुरुषो व्याख्यातः। तथा केषांचित् कालः कारणमित्युक्तं च। कालः पञ्चास्ति भूतानि कालः संहरते जगत्। कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः। व्यक्तमव्यक्तपुरुषास्त्रयः पदार्थास्तेन कालोऽन्तर्भूतोस्ति स व्यक्तः सर्व्वकर्तृत्वात् कालस्यापि प्रधानमेवकारणं स्वाभावोप्यत्रैवलीनः तस्मात् कालो न कारणं। नापि स्वभाव इति। तस्मात् प्रकृतिरेव कारणं न प्रकृतेः कारणान्तरमस्तीति। न पुनर्दर्शनमुपयाति पुरुषस्य। अतः प्रकृतेः सुकुमारतरं सुभोग्यतरं न किंचिदीश्वरादिकारणमस्तीति मे मतिर्भवति। तथा च श्लोके रूढं। पुरुषो मुक्तः पुरुषः संसारीति चोदितेत्याह।

---

तस्मान्नबध्यते नापि मुच्यते नापि संसरति कश्चित्
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ।६२।

तस्मात् कारणात् पुरुषो न बध्यते नापि मुच्यते नापि संसरति यस्मात्

कारणात् प्रकृतिरेव नानाश्रया दैवमानुषतिर्य्यग्योन्याश्रया बुद्ध्यहंकारतन्मा त्रेन्द्रियभूतस्वरूपेण बध्यते मुच्यते संसरति चेति। अथ मुक्त एव स्वभा वात् सस र्व्वगतश्चकथं संसरत्यप्राप्तप्रापणार्थं संसरणमिति तेन पुरुषो बध्यते पुरुषो मुच्यते संसरति व्यपदिश्यते येन संसारित्वं न विद्यते सत्वपुरुषान्त ज्ञानात् तत्वं पुरुषस्याभिष्वज्यते। तदभिव्यक्तौ केवलः शुद्धो मुक्तः स्वरूप प्रतिष्ठः पुरुष इति। अत्र यदि पुरुषस्य बन्धो नास्ति ततो मोक्षोऽपि नास्ति। अत्रोच्यते प्रकृतिरेवात्मानं बध्नाति मोचयति च यत्र सूक्ष्मशरीरं तन्मात्रकं त्रिविधकरणोपेतं तत् त्रिविधेन बन्धेन बध्यते। उक्तं च। प्राकृतेन च बन्धेन तथा वैकारिकेण च। दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते। तत् सूक्ष्मं शरीरं धर्म्माधर्म्म संयुक्तं। प्रकृतिश्च बध्यते प्रकृतिश्च मुच्यते संसरतीति कथं तदुच्यते।

---

रूपैः सप्तभिरेवबध्नात्यात्मानमात्मना प्रकृतिः
सैव च परुषार्थं प्रति विमोचयत्येकरूपेण। ६३।

---

रूपैः सप्तभिरेवैतानि सप्त प्रोच्यन्ते धर्म्मो वैराग्यमैश्वर्य्यमधर्म्मोऽज्ञानमवै राग्यमनैश्वर्य्यमेतानि प्रकृतेः सप्तरूपाणि तैरात्मानं स्वं बध्नाति प्रकृतिरा त्मानं स्वमेव सैव प्रकृतिः पुरुषस्यार्थः पुरुषार्थः कर्त्तव्य इति विमोचयत्या त्मानमेकरूपेण ज्ञानेन। कथं तज्ज्ञानमुत्पद्यते।

---

एवं तत्वाभ्यासान्नास्ति न मे नाहमित्यपरिशेषं
अविपर्य्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानं। ६४।

---

एवमुक्तेन क्रमेण पञ्चविंशतितत्वालोचनाभ्यासादियं प्रकृतिरयं पुरुष एता नि पंचतन्मात्रेन्द्रियमहाभूतानीति पुरुषस्य ज्ञानमुत्पद्यते नास्ति नाहमेव

भवामि न मे मम शरीरं तद्यतोऽहमन्यः शरीरमन्यन्नाहमित्यपरिशेषमहं काररहितमपरिशेषमविपर्य्ययाद्विशुद्धं विपर्य्ययः संशयोऽविपर्य्ययादसंशया द्विशुद्धं केवलं तदेवनान्यदस्तीति मोक्षकारणमुत्पद्यतेऽभिव्यज्यते ज्ञानं पंच विंशतितत्वज्ञानं पुरुषस्येति । ज्ञाने पुरुषः किं करोति ।

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्तां
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः सुस्थः । ६५ ।

तेन विशुद्धेन केवलज्ञानेन पुरुषः प्रकृतिं पश्यति प्रेक्षकवत् प्रेक्षकेण तुल्यम वस्थितः स्वस्थो यथा रंगप्रेक्षकोऽवस्थितो नर्त्तकीं पश्यति स्वस्थः स्वस्मि न्स्तिष्ठति स्वस्थः स्वस्थानस्थितः । कथं भूतां प्रकृतिं निवृत्तप्रसवां निवृत्त बुद्ध्यहंकारकार्य्यानर्थवशात् सप्तरूपविनिवृत्तां निवर्त्तितोभयपुरुषप्रयोजन वशाद्यैः सप्तभीरूपैर्धर्म्मादिभिरात्मानं बध्नाति तेभ्यः सप्तभ्यो रूपेभ्यो विनि वृत्तिं प्रकृतिं पश्यति । किंच ।

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य । ६६ ।

रंगस्थ इति यथा रंगस्थ इत्येवमुपेक्षक एकः केवलः शुद्धः पुरुषस्तेनाहंदृष्टेति कृत्वा उपरता निवृत्ता एका एकैव प्रकृतिः त्रैलोक्यस्यापि प्रधानकारणं भूता न द्वितीया प्रकृतिरस्ति मूर्त्तिबधे जातिभेदादेवं प्रकृतिपुरुषयो निर्वृत्ता वपि व्यापकत्वात् संयोगोऽस्ति न तु संयोयात् कुतः सर्गो भवति । सति संयोगेऽपि तयोः प्रकृतिपुरुषयोः सर्वगतत्वात् सत्यपि संयोगे प्रयोजनं ना स्ति सर्गस्य सृष्टेश्चरितार्थत्वात् प्रकृतेर्द्विविधप्रयोजनं शब्दविषयोपलब्धिर्गु

णपुरुषान्तरोपलब्धिश्च। उभयत्रापि चरितार्थत्वात् सर्गस्य नास्ति प्रयोजनं यः पुनः सर्ग इति। यथा दानग्रहणनिमित्त उत्तमर्णाधमर्णयोर्द्रव्यविशुद्धौ सत्यपि संयोगे न कश्चिदर्थसम्बन्धो भवति। एवं प्रकृति पुरुषयोरपि नास्ति प्रयोजनमिति। यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षो भवति ततो मम कस्मान्न भवतीति। अत उच्यते।

सम्यग्ज्ञानाधिगमाद्धर्म्मादीनामकारणप्राप्तौ
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः । ६७।

यद्यपि पंचविंशतितत्वज्ञानं सम्यक् ज्ञानं भवति तथाऽपि संस्कारवशाद्धृत शरीरो योगी तिष्ठति कथं चक्रभ्रमवच्चक्रभ्रमेण तुल्यं यथा कुलालश्चक्रं भ्रमयित्वा घटं करोति मृत्पिण्डं चक्रमारोप्य पुनः कृत्वा घटं पर्य्यामुंचति चक्रं भ्रमत्येव संस्कारवशादेवं सम्यग्ज्ञानाधिगमादुत्पन्नसम्यग्ज्ञानस्य धर्म्मादीनामकारणप्राप्तौ एतानि सप्तरूपाणि बन्धनभूतानि सम्यग्ज्ञानेन दग्धानि यथा नाग्निना दग्धानि वीजानि प्ररोहणसमर्थान्येवमेतानि धर्म्मादीनि बन्धनानि न समर्थानि। धर्म्मादीनामकारणप्राप्तौ संस्कारवशाद्धृत शरीरस्तिष्ठति ज्ञानाद्वर्त्तमानधर्म्माधर्म्मक्षयः कस्मान्नभवति वर्त्तमानत्वादेव क्षणान्तरे क्षयमप्येति ज्ञानं त्वनागतकर्म्म दहति वर्त्तमानशरीरेण च यत् करोति तदपीति विविहितानुष्ठानकरणादिति संस्कारक्षयाच्छरीरपाते मोक्षः। स किं विशिष्टो भवतीत्युच्यते।

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति । ६८।

धर्म्माधर्म्मजनितसंस्कारक्षयात् प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानस्यनि

वृत्तौ ऐकान्तिकमवश्यमात्यन्तिकमनंतर्हितं कैवल्यं केवलभावान्मोक्ष उभय मैकान्तिकात्यन्तिकमित्येवविशिष्टकैवल्यमाप्नोति ।

---

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानां । ६९ ।

पुरुषार्थो मोक्षस्तदर्थं ज्ञानमिदं गुह्यं रहस्यं परमर्षिणा श्रीकपिलर्षिणा समाख्यातं सम्यगुक्तं यत्र ज्ञाने भूतानां वैकारिणां स्थित्युत्पत्तिप्रलया अव स्थानाविर्भावतिरोभावाश्चिन्त्यन्ते विचार्य्यन्ते येषां विचारात् सम्यक् पंच विंशतितत्वविवेचनात्मिका सम्पद्यते संवित्तिरिति

सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि
यत्रैताः सप्ततिरार्य्या भाष्यं चात्रगौडपादकृतं ।

---

एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ
आसुरिरपि पंचशिखाय तेन च बहुधा कृतं तन्त्रं । ७० ।
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्य्याभिः
संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तं । ७१ ।
सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्यषष्टितन्त्रस्य
आख्यायिकाविरहिताः परवादविवर्ज्जिताश्चापि । ७२ ।

---

# VARIATIONS AND CORRECTIONS.

THE text of the *Káriká* has been in the first instance derived from a copy in the handwriting of Mr. Colebrooke, which he had prepared for the press. I have collated this with Professor Lassen's edition and with a very good manuscript in my own possession. Besides these, the different commentaries include the text, and the *Sánkhya Pravachana Bháshya* cites many verses of the *Káriká*. Altogether, therefore, the text may be considered as printed upon a collation of eight copies, which may be thus referred to: A. Mr. Colebrooke's transcript; B. my MS. copy; C. Professor Lassen's edition; D. the text in GAURAPÁDA's commentary; E. that in the *Sánkhya Tatwa Kaumudí;* F. that in the *Sánkhya Chandriká;* G. that in the *Sánkhya Kaumudí;* and H. the passages of it in the *Sánkhya Pravachana Bháshya.* Of the *Sánkhya Tatwa Kaumudí* I had three copies, and two copies of the *Sánkhya Chandriká.* I had but one copy of the *Bháshya* of GAURAPÁDA.

P. 1. l. 1. तदभिघातके A. D. G. तदपघातके B. C. E. F.

P. 2. l. 14. हेतुः दुःख would be more correctly हेतुर्दुःखः Wilkins, r. 53. In noticing this deviation from rule, however, my chief object is to observe, that such deviations are frequent in the MSS., and that, although I have corrected some of them, I do not regard them in all cases as errors or inadvertencies: they seem in general to be intentional, and to be designed for the sake of greater perspicuity.

P. 3. l. 9. For विशुद्धि read विशुद्धि

P. 5. l. 17. For तस्भिन् read तस्मिन्

P. 5. l. 18. प्रतिजान्वाससज्ञानं. As intimated in the translation (p. 21), these words are of questionable import, and possibly erroneous. The

want of another copy renders their correction hazardous, but in all probability the first term should be प्रतिभा or प्रतिभान् ordinarily 'light' or 'shining,' but perhaps here said to denote वास 'abode, place;' or the construction may be प्रतिभा — अन्वाससज्ञानं implying 'conformity, adaptation,' from अनु 'according to,' and आस 'to sit.'

P. 6. v. 6. प्रतीति—प्रसिद्धि D.

P. 8. v. 8. सरूपं—स्वरूपं G. which Professor Lassen has followed. All the other copies concur in the first reading, which the sense of the verse, as explained by the scholiasts, requires.

P. 10. l. 11. For रुपं read रूपं

P. 11. l. 4, 5, 7. Some blanks occur in this part of the MSS. of the *Bháshya*, which have been conjecturally supplied; as, कृष्णतन्तु - - कृष्ण and प्रधानमेव - - वेक्तुं न या - - द्विवेकि and तथा सामान्या - - प्रधानं How these have been supplied may be seen in the respective passages.

P. 11. l. 11. For पुरुश read पुरुष

P. 12. l. 10. For अभिवा and अभिमवा read अभिभवा

P. 13. l. 2. For सत्वमसो read सत्वतमसो

P. 13. v. 13. Professor Lassen changes उपष्टम्भकं to उपस्तम्भकं which he derives from ष्टभ 'stabilire, firmare.' All the MSS., however, read the word with the cerebral, not the dental sibilant, and there is no doubt of their accuracy. The rule of Panini by which a radical ष is changed in inflexion to स, धात्वादेः षः सः not applying to this word, which is derived from स्तम्भु cl. 5 and 9. This root is the subject of a special rule, by which it is provided that after a preposition containing the vowel इ or उ the radical स shall be changed to ष. Of course after ष, त is changed to ट, making उपष्टम्भ. The original rule is Panini, 8. 3. 67. स्तम्भेः । स्तम्भु । इत्येतस्य धातोरवयवस्यस् ॥ इत्येतस्योपसर्गस्थादिण उत्तरस्य मूर्द्धन्य आदेशः स्यात् । अभिष्टभ्नोति परिष्टभ्नाति; to which we may add उपष्टभ्नाति, whence उपष्टम्भक

P. 16. l. 14. आर्य्याद्वयेन has been substituted for the आदावद्वयेन of the MSS., which is evidently incorrect.

P. 16. l. 15. For मयमुपगम्यते read मभ्युपगम्यते

P. 16. v. 17. H. reads संहत for संघात. The sense is the same.

P. 16. l. 18. For माक्ष read मोक्ष

P. 17. l. 7. For अस्यात्मा read अस्त्यात्मा

P. 17. v. 18. For जनन—जन्म B. D. Either word is correct.

P. 19. v. 20. भवत्युदासीन B. D. omitting इति. The sense is unaffected, and the metre is preserved by reading the final syllable long.

P. 19. l. 8. The third word should be उदासीनो

P. 19. l. 19. For वचसो विश्वस्त read वचसोर्विश्वस्त

P. 20. l. 9. For अलिंगस्य read अलिंगस्याः

P. 21. l. 1. For यचोक्तं read यथोक्तं

P. 22. v. 24. The second line is read ऐन्द्रिय एकादशकस्तन्मात्रः पञ्चकश्चैव B. and एकादशकश्चगणस्तन्मात्रः पंचलक्षणोपेतः D. The sense is much the same, but the last is wrong as to metre. It is evident also from the comment that follows that it is a mistake, and that the final words should be पंचकश्चैव—पंचलक्षणोपेत being the explanation of पंचक

P. 23. v. 26. पायूपस्थानि B. पायूपस्थाः E. In the first line, रसनत्वगाख्यानि is the reading of B. C. E. F. but D. confirms the text, not only by the same terms, रसनस्पर्शनकानि, but by explaining the term स्पर्शनक

P. 24. v. 27. बाह्यभेदाश्च A. E. F. बाह्यभेदाच्च B. C. D. The difference involves a difference of interpretation, as noticed in the Comment (p. 99). The explanation of the *Bháshya*, D, is so clearly incompatible with the reading बाह्यभेदात् that in the first instance I corrected it to बाह्यभेदाः as in the same page, l. 15, 18, which should be read, agreeably to the MSS., बाह्यभेदाच्च

P. 24. l. 23. For तत् कृत read तत् कृता, and for चक्षु ख read चक्षुः ख

P. 25. v. 28. रूपादिषु B. D. विहार C. D. The variations are immaterial.

P. 25. l. 12. For परिणतो मलोत्सर्गः read परिणतमलोत्सर्गः

P. 26. l. 6, 7. For वृत्तिन्द्रियस्य read वृत्तिरिन्द्रियस्य

P. 26. l. 3, &c. स्यन्दनं ought perhaps to be स्पन्दनं. See Translation, p. 105.

P. 26. l. 22. After तत्रोपरूढां some such word as वह्निं should be inserted, although it is not in the MS.: it occurs in the passage when repeated in p. ३६

P. 27. l. 8. For ३२ read ३१

P. 29. l. 3 and 15. For गुह्णन्ति—गुह्णाति read गृह्णन्ति—गृह्णाति

P. 29. l. 4. For प्रकाशायन्ति read प्रकाशयन्ति

P. 30. l. 11. For प्राप्य इयं read प्राप्यमियं

P. 30. l. 14. अवापात्, which is the reading of the copy, should probably be अवायात् 'after departure' or 'death.'

P. 30. l. 21. For प्रतजो read प्रजो

P. 31. l. 6. भ्रष्टस्य has been conjecturally supplied, the writing of the copy being very indistinct.

P. 31. l. 16. The MS. has पुष्ठ्युदर which has no meaning, and has been therefore conjecturally changed to पृष्ठोदर

P. 31. l. 20. Instead of शरीरं कर्म्मवशात् it is possible that the phrase should be शरीरमधर्म्मवशात् 'from the influence of iniquity.'

P. 33. l. 11. A passage has been here omitted: it should run, गुणपुरुषान्तरोपलब्धिलक्षणश्च । शब्दाद्युपलब्धिर्ब्रह्मादिषु लोकेषु गन्धादिभोगावाप्तिः । गुणपुरुषान्तरोपलब्धिर्मोक्ष इति. It has been given in the Translation, p. 137.

P. 33. l. 18. For विदुषक read विदूषक

P. 36. v. 47. शक्तेश्च D. which is allowable.

P. 37. l. 4. तन्मात्राष्टासु was read in the MSS. तन्मात्राद्यासु which was evidently an error.

P. 37. l. 18. For तत्तैकादश read तत्रैकादश

P. 38. l. 1. The MS. has विपर्य्ययाच्छक्तितुष्टिनामेव which the sense shews to be erroneous.

P. 38. l. 11. For इत्येष read इत्येषा

P. 38. v. 50. आध्यात्मिक्यश्चतस्त्र E. The difference is unimportant. F. has भागाख्या which is incorrect; विषयोपरमाश्च D; and D. F. read अभिहिता for अभिमता

P. 39. l. 9. After प्राप्य insert मोक्षं याति

P. 40. l. 9. For आश्रयो read आश्रयौ

P. 40. v. 53. The reading of this verse is materially varied in D, although the sense is substantially the same:

अष्टविकल्पं दैवं तैर्य्यग्योनं पंचधा भवति
मानुष्यं त्वेकविधं समासतोऽयं त्रिधा सर्गः ।

Professor Lassen has तैर्य्यग्योन्य, which is not warranted by any MS. and although perhaps a defensible, is an unusual form of the derivative. G. has तैर्य्यग्यौन

P. 42. v. 56. प्रकृतिकृतौ D; and the variation is advisedly, as appears by the comment.

P. 43. v. 59. आत्मानं प्रकाश्य—प्रविश्य D. But the term of our text is used in the following comment.

P. 43. v. 60. For चरति—कुरुते D.

P. 44. v. 61. प्रकृतिः सुकुमारतरं C; which is manifestly wrong.

P. 44. l. 6. Although suspecting some error in this citation, I had no means of correcting it. Before printing the translation, however, I met with the passage correctly given in the commentary of Madhusúdana Gupta upon the *Bhagavad Gita*, and have rendered it accordingly in p. 172. It should be, अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः

P. 44. v. 62. तस्मान्नबध्यतेऽद्धा E; and अद्धा is explained स्फुटावधारणयोः The particle is not inserted in any other copy. C. is singular in the order of the words, and transposing मुच्यते and बध्यते

P. 45. l. 5. Instead of अभिष्वज्यते read अभिव्यज्यते

P. 46. v. 66. A. B. E. F. G. agree in reading उपरमत्यन्या, although, as Professor Lassen justly objects, "metro refragatur." D. gives the correcter reading उपरतैका, explaining it उपरता निवृत्ता एका एकैव प्रकृतिः

This copy also varies in the beginning of the hemistich: रंगस्य इत्युपेक्षक एको दृष्टाहमित्युपरतैका

P. 47. l. 4. For पुरुस्य read पुरुषस्य

Other variations than those specified above may no doubt be discovered in different manuscripts, and even in those which have been consulted; but they are in general palpable blunders of transcription, unworthy of the honour of being perpetuated in print.

creative commons

Attribution-NonCommercial-ShareAlike 3.0 Unported

## You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

## Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

## With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer